आरण्यकम् सितम्बर 2006/मार्च 2007
अर्धवार्षिकं संस्कृतशोधपत्रम् आर.एन.आई. सं.58951/94

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्) - स्व. पण्डित कमलाकान्त उपाध्यायः 15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः) - श्री देवकुमार मिश्रः 'अलमस्त' 15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा - श्री नर्मदेश्वर ओझा 15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन' 35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा 51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा 51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः' 41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य' -श्री जगदीश्वर प्रसाद मिश्र 'नलिन' 51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन' 51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व.पं. उपेन्द्रनारायणदत्त शर्मा 41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व.पण्डित उपेन्द्रनारायणदत्त शर्मा 21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पण्डित व्रजभूषणमिश्र 'आक्रान्तः' 51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन' 51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः' 51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः 60 रूप्यकाणि
17. कृत-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः 204 रूप्यकाणि

# आरण्यकम्

अर्धवार्षिकं संस्कृतशोधपत्रम्

संयुक्ताङ्कः

## संस्कृतप्रसारपरिषद्

आरा (विहारः)

सितम्बर 2006
मार्च 2007

## 'आरण्यक'स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः) मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्कः उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कं त्रिंशत् (30) रूप्यकाणि, तथा च एकस्याङ्कस्य पञ्चदश रूप्यकाणि वर्तते। शुल्कं धनादेश/ड्राफ्टमुखेन प्रेषणीयम्।

   (क) धनादेश (M.O.) द्वारा शुल्कप्रेषणं **डॉ. गोपबन्धु मिश्रः, रीडर, संस्कृतविभागः, काशी हिन्दू विश्वविद्यालयः, वाराणसी-221005** इति नाम्ना करणीयम्।

   (ख) बैंक ड्राफ्ट **'संस्कृतप्रसारपरिषद्'** इति नाम्ना 'आरा' (विहारः) नगरे व्यवहरणीयं कृत्वा प्रेषणीयम्।
4. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते। अस्वीकृता लेखा निर्धारित-'स्टाम्प'-प्राप्त्यनन्तरं प्रत्यावर्तयितुं शक्याः।
5. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं च लभन्ते।
6. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किताः वा स्युः। रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशश्च उल्लिखितौ स्याताम्।
7. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
8. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
9. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
10. 'आरण्यक'सम्बद्धः सर्वविधपत्रव्यावहारः डॉ. गोपबन्धु मिश्रः, रीडर, संस्कृत-विभागः, काशी हिन्दू विश्वविद्यालयः, वाराणसी-221005 इति सङ्केतेन विधेयम्। दूरभाषाः-0542-2366155, (चलः) 09450870788

❖

# आरण्यकम्

संस्कृतप्रसारपरिषदः अर्धवार्षिकं शोधपत्रम्

## संयुक्ताङ्कः

वर्षाङ्कौ - त्रयोदश वर्षम्, द्वितीयाङ्कः
चतुर्दश वर्षम्, प्रथमाङ्कः

आश्विनः, वि०सं० २०६३ तथा च चैत्रः, वि०सं० २०६४

सितम्बर, २००६ तथा च मार्च, २००७

**प्रतिवर्षं प्रकाशनकालः**
**चैत्रः, आश्विनः-विक्रमाब्दः**
**मार्च, सितम्बर**

प्रत्यङ्कम् - १५ रूप्यकाणि
संयुक्ताङ्कः - ३० रूप्यकाणि

वार्षिकं शुल्कं ३० रूप्यकाणि

## परामर्शदात्री समितिः

डॉ. सुरेशचन्द्र गो. काण्टावाला, बड़ोदरा

डॉ. हरिहर झा, दरभङ्गा

डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना

डॉ. भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी

डॉ. राय अश्विनी कुमारः, बोधगया

❖

संस्थापकः

**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः**

❖

सम्पादकः

**डॉ. गोपबन्धु मिश्रः**

❖

सह-सम्पादकः

**डॉ. सुनीलकुमार प्रधानः**

❖

प्रकाशिका

**संस्कृतप्रसारपरिषद्**

मारुतिमन्दिरम्

**प्रकाशपुरी, आरा (बिहारः) 802301**

❖

संस्कृतप्रसारपरिषद्, आरा पक्षतः डॉ. गोपबन्धु मिश्रेण, इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।


**डॉ. गोपबन्धु मिश्रः**
**सम्पादकः**

# सम्पादकीयम्

क्रिया सरला। प्रतिक्रिया कुटिला। ज्ञानं स्वल्पम्, प्रदर्शनं महत्। आरोग्यं कादाचित्कम्, अनारोग्यं निरन्तरम्। शरीरं स्थिरम्, मनः चञ्चलम्। भाषणं निर्द्वन्द्वम्, चित्तं सद्वन्द्वमोहम्। वचसि उदारता, चेतसि सङ्कीर्णता। वाण्या पुरस्कारः, व्यवहारेण तिरस्कारः। सदसि वाक्पुटता, आत्मनि निश्शब्दता निस्सङ्गता वा। जीवद्दशायां प्रताडनम्, मरणान्ते माल्यार्पणम्। अन्तःकरणे विशुद्धा नास्तिकता, चित्रपटादेः पुरतः 'प्रसाद' समर्पणम्। अर्थे प्रसक्तिः, धर्मे अनासक्तिः। वृत्ते प्रवृत्तिः, वृत्तौ तटस्थता। गृहे स्वजनन्या उपेक्षा, मन्दिरे प्रस्तरमय्याः देव्याः पुरतः कृच्छ्रसाधना। साधनं मुख्यभूतम्, साध्यम् अज्ञातं विस्मृतं वा। परस्परविरोधिनीनाम् एतासाम् एतादृशानां च वृत्तीनां समवाय एव जीवनम्। एको वदति - जीवनस्याधारा नाम भोजनपानशयनादयो वृत्तयः। अपर आह- आदर्शः सिद्धान्तः मूल्यं वा जीवनस्याधारः। तर्हि को मार्गः श्रेयान्? केनोपायेन एतस्माद् द्वन्द्वान् मोचनम्? द्वन्द्वमिमं कुत्र ब्रूयाम? एकेन कविना एतादृशप्रसङ्गे साङ्कीर्ण्यम् एवं प्रास्तूयत--

**गोपने जीवनग्लानिर्मानहानिरगोपने।**
**अनूढाऽनङ्गव्यथेव ममेयं मानसी कथा॥**

कथं सोढव्योऽयम् अयमसाध्यो द्वन्द्वः?

एतादृशं द्वन्द्वम् आदौ श्रीमद्भगवद्गीता एवंप्रकारेण प्रस्तौति--

**नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः।**
**न चाऽतिस्वप्नशीलस्य जाग्रतो नैव चार्जुन॥** (गीता 6/16)

यः पूर्णतः अनश्नन् भवति तस्य सर्वसिद्धीनां साधनीभूतस्य शरीरस्य पातः सम्भाव्यते। मुख्यसाधने पतिते का कथा साध्यसिद्धेः? एतद्वैपरीत्ये यः केवलम् अशनव्यसनी भवति स देहैकसर्वस्वो भवत्यतः तस्य लक्ष्यं किमपि न भवति, भवति चेदपि तद् गौणं भवति। तद्वत् केवलं शयानस्य जीवनमूल्यादिविषये निरुत्साहस्य वा जीवनं निरर्थकमेव, तथैव शारीरिकविश्रान्तिम् अपरिगणय्य यः साधनां कुरुते, तस्यापि शरीररक्षा, तद्द्वारा साध्यसिद्धिरिति क्रमो भ्रष्टो भवति, आशयोऽत्रैव यत् अन्यतरस्मिन् पक्षे केवलं तत्पक्षाश्रयणेन सार्थकता नास्ति। तर्हि क उपायः स्वीकर्तव्य इति जिज्ञासामुपशमयितुं श्रीभगवान् एवमुवाच--

**युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।**
**युक्तस्वप्नावबोधस्य योगो भवति दुःखहा॥** (गीता 6/17)

अर्थात् शरीररक्षामुछिश्य भोजनादिस्वीकरणीयम्, तथा च स्वसहजकर्मणि सर्वदा

युक्तचेष्टो भवेत्। शयनं जागरणं चेति उभयमप्यपेक्षितम्। भौतिकदृष्ट्या एताभ्यां शरीरं कार्यक्षमं भवति, क्लान्तिरपि न बाधते। तथा च सूक्ष्मदृष्ट्या शयनं विषयाणां प्रसङ्गे, जागृतिः अवबोधस्य ज्ञानस्य वा विषये इति वक्तुं पार्यते। इतरत्रापि वक्ति श्रीभगवान्--

**या निशा सर्वभूतानां तस्यां जागर्ति संयमी।**
**यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः॥** (गीता 2/64)

तर्हि एतेनोभयविश्चरणेन को लाभः, का च परिणतिः तदेव उक्तं (पूर्वमेव) श्रीभगवता--योगो भवति दुःखहा। दुःखं हन्ति इति दुःखहा। सर्वे प्राणिनः सुखमेव वाञ्छति, न तु मनागपि दुःखम्। तर्हि सुखप्राप्तेः उपायकथनापेक्षया दुःखविनाशोपायकथनमेव वरं मनुते श्रीभगवान्। दुःखस्यावश्यंभावित्वात् तस्य नाशोपायश्चिन्त्यते चेत् स्वतः सुखप्राप्तेरुपायो निरङ्कुशो भविष्यति। अतः जीवने पूर्वकथितेषु द्वन्द्वेषु सत्स्वपि अखिलसिद्धिसाधनीभूतस्य शरीरस्य रक्षायै आवश्यकीयमशनादि कर्म कुर्वाण एव मूल्याधारितं जीवनं जीवेन्मनुष्य इति तात्पर्यम्।

एतादृशं किमपि मूल्यं स्वशरीरेण संसाधयितुकाममिदम् आरण्यकं गतेषु वर्षेष्विव ऐषमोऽपि प्रायतत। व्यावहारिककाठिन्याद् 2063 विक्रमसंवत्सरस्य आश्विनमासस्य अङ्कः (सितम्बर, 2006) प्रकाश्यं नागत इति सखेदं सूच्यते। तद्धेतुनाऽयं विशेषाङ्कः (सितम्बर, 2006 - मार्च 2007) अङ्कद्वयविषयं स्वाङ्के निधाय प्रकाश्यमानोऽस्ति। आगामिनि काले पत्रस्याऽस्य नियतकालिकता यथा न व्याहन्येत तथा प्रयतिष्यते।

अङ्केऽस्मिन् वेद-वेदाङ्गादिविषयकैः लेखैः सह दार्शनिका विषया अपि स्थानं लभन्ते। आरण्यकमिदं स्वाध्यायेन स्वाध्यायप्रणयिनां श्रमेण च सततं पुष्टिं यायादिति अभिप्रेत्य समेषां विदुषां सदाशयतां सम्प्रार्थ्य अत्रैव साङ्गीक्रियते।

**गोपबन्धुमिश्रः**
सम्पादकः
आरण्यकस्य

# सूचीपत्रम्


| | विषयः | लेखकः | पृष्ठम् |
|---|---|---|---|
| 1. | प्रगृह्यसंज्ञाविमर्शः | डॉ. सौ. भाग्यलता पाटसकरः<br>निदेशिका, आदर्शसंस्कृतशोधसंस्था<br>वैदिकसंशोधकमण्डलम्, पुणे - 37 | 1 |
| 2. | वैदिकसृष्टिविद्याया वैज्ञानिकानुशीलनम् | पराम्बा श्रीयोगमाया<br>शोधच्छात्रा, उत्कलविश्वविद्यालयः<br>वाणीविहारः, भुवनेश्वरम् | 7 |
| 3. | वैदिकवाङ्मये नारीणां दशाविमर्शः | श्री वैद्यनाथमिश्रः | 17 |
| 4. | अधिमासविमर्शः | डॉ. भारतभूषणमिश्रः<br>व्याख्याता, ज्योतिषविभागः<br>राष्ट्रियसंस्कृतसंस्थानम्<br>जम्मूपरिसरः | 23 |
| 5. | भविष्यपुराणीयपर्यावरणम् | डॉ. मखलेश कुमारः<br>पौराणिक तथा वैदिक<br>अध्ययन एवं अनुसन्धानसंस्थान<br>नेमिषारण्य, सीतापुर | 31 |
| 6. | वैदिकनारीणामानुष्ठानिकी उपस्थितिः | डॉ. उमेश प्रसाद सिंहः<br>उपाचार्यः, संस्कृतविभागः<br>काशीहिन्दूविश्वविद्यालयः<br>वाराणसी | 39 |
| 7. | वैदिकध्वनिविज्ञाने स्फोटविचारः | श्री सुशीलकुमारपाठकः<br>शोधच्छात्रः, संस्कृतविभागः<br>महात्मा गान्धी काशी विद्यापीठम्<br>वाराणसी | 43 |

| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| 8. मनुस्मृतौ मानवीयो मूल्यबोधः | प्रो. शुकदेव भोई<br>आचार्यः, साहित्यविभागः<br>श्री लालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्<br>कटवारियासराय, नई दिल्ली | 47 |
| 9. शक्तिविषयको विचारः | डॉ. शरदिन्दुकुमार त्रिपाठी<br>यू.जी.सी. प्राध्यापकः<br>साहित्यविभागः<br>सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः<br>वाराणसी | 55 |
| 10. शास्त्रेषु ओङ्कारविमर्शः | डॉ. द्रोणाचार्य पाण्डेयः<br>संस्कृतशिक्षकः<br>ज्ञाननिकेतनम्, बेलीरोड<br>पटना | 61 |
| 11. पुस्तकसमीक्षा ईश्वरदर्शनम् (अथवा तपोवनचरितम्) | मूलरचना - स्वामी तपोवनम्<br>चिन्मय इण्टरनाषणल् फौण्डेषन्,<br>केरलम्<br>समीक्षकः - डॉ. सुनीलकुमार प्रधानः | 65 |


# प्रगृह्यसंज्ञाविमर्शः


**डॉ. सौभाग्यलता पाटसकर**


प्रगृह्यमिति पाणिनिपूर्वकालिकी संज्ञा तत्रभवता सूत्रकारेण प्रथमाध्यायस्य प्रथमे पादे एकादशतः एकोनविंशतिं यावत् नवभिः सूत्रैः प्रगृह्यमिति संज्ञा व्यधायि। संक्षेपेण तद् यथा–

इदूदेद् द्विवचनं प्रगृह्यम् 1.1.11 अनेन सूत्रेण अग्नी, वायू माले इत्यादीनि इदूदेदन्तानि द्विवचनान्तानि रूपाणि प्रगृह्याणि भवन्ति।

अदसो मात् 1.1.12 इत्येतेन अमी इत्यस्य प्रगृह्यत्वं विधीयते।

शे 1.1.13 अनेन सूत्रेण अस्मे युष्मे त्वे इत्येतादृशानां छान्दसरूपाणां प्रगृह्यत्वं सिद्धम्।

निपात एकाजनाङ् 1.1.15 आहो, उताहो इत्येतादृशानाम् ओदन्तानां निपातानां प्रगृह्यसंज्ञा कृता।

संबुद्धौ शाकल्यस्येतावनार्षे 1.1.16 अस्य सूत्रस्य संबुद्धौ शाकल्यस्य इत्येवं योगविभागं कृत्वा अध्वर्यो अद्रिभिः सूतम्। (ऋ.9.51.1.) इति संहितांशे अध्वर्यो इति अविकृतस्य पदस्य प्रगृह्यत्वं संपादितं कैश्चित्।

समग्रेण सूत्रेण तु पदपाठे सेतिकरणानाम् ओदन्तानां संबुद्धिपदानां प्रगृह्यत्वं संपादितम् इन्दो इति। वायो इति। इत्यादि।

उञः 1.1.17 शाकल्यस्य आचार्यस्य मतेन उञः प्रगृह्यसंज्ञा भवति। तेन "उ इति" उदाहरणं सिध्यति। शाकल्यग्रहणं विभाषार्थमिति उक्तवता वृत्तिकारेण उ इत्येतस्य प्रगृह्यत्वात् 'विति' इति उदाहृतम्।

ऊँ 1.1.18 अनेन सूत्रेण उञः इतौ अनार्षे ऊँ इत्ययमादेशो भवति, दीर्घः अनुनासिकश्च शाकल्यस्य मतेन प्रगृह्यसंज्ञकश्च। तेन सांहितिकस्य उकारस्य पदपाठे उ इति एकं प्रगृह्यं रूपं भवति। ऊँ इति अन्यत् आदेशयुक्तं प्रथमेन

विकल्पितम्। शाकल्यग्रहणं विभाषार्थमिति संप्रदायवचनं स्वीकृत्य "विति" इति अप्रगृहीतमेकं रूपं सिध्यति। अनयोः सूत्रयोः विषये 'उञः ऊँ' इति एकमेव सूत्रं स्थान्यादेशविधायकं प्रकृतविषयासंबद्धमिति एकमन्यत् मतमादृतं विद्वद्भिः।

ईदूतौ च सप्तम्यर्थे 1.1.19 अनेन सूत्रेण ईदन्तमूदन्तं च शब्दरूपं सप्तम्यर्थे वर्तमानं प्रगृहीतम्। मामकी तनू (अथर्व 1.6.8) गौरी (सोमो गौरी अधिश्रितः) इत्येतानि रूपाणि प्रगृह्यसंज्ञापन्नानि अनेन सूत्रेण।

एवं प्रगृह्यमिति पदविशेषो भवति। पदास्वैरिबाह्यापक्ष्येषु च 3.1.199 इत्यनेन सूत्रेण प्रोपसर्गात् ग्रहधातोः क्यपि प्रत्यये, कित्त्वाच्च संप्रसारणे कृते प्रगृह्य इति प्रातिपदिकं सिद्धम्।

**प्रगृह्यसंज्ञाकार्यम्**–प्रगृह्यसंज्ञकं पदं सत्यपि संभवे सन्धिकृतं विकारत्वं नापद्यते। **प्लुतप्रगृह्या अचि** 6.1.125 इत्येतेन सूत्रेण प्रगृह्यसंज्ञकानां प्रकृतिभावो विहितः अचि परतः। अग्नी इति, वायू इति खट्वे इति इत्यत्र सवर्णदीर्घस्य (6.1.101), यणादेशस्य (6.1.77), अयादेशस्य (6.1.78) च प्रतिषेधो भवति।

अणोऽप्रगृह्यस्यानुनासिकः (8.4.57) इत्येतेन सूत्रेण अप्रगृह्यस्य अणः अवसाने अनुनासिकत्वं विकल्पेन विहितम्। तेन दधि, दधिं वा, मधु वा मधुँ वा कुमारी कुमारीं वा इति रूपद्वयं सिध्यति। प्रगृह्यसंज्ञकानां तु एवंविधोऽनुनासिकभावो नास्ति। अग्नी। वायू इति।

एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ (8.2.107) इत्यनेन सूत्रेण अप्रगृह्यस्य एचः प्लुतविषयस्य अर्धस्य अदादेशः उत्तरस्य तु इदुतौ विहितौ-दूराद्धूते। प्रगृह्यस्य एकारस्य कृते तु प्रतिषेधः। तेन शोभने खलु स्त खट्वे 3 इत्यत्र खट्वे इति एदन्तं पदं प्रगृह्यत्वान्न विभज्यते।

यस्य शाकल्यस्य ग्रहणं पाणिनिना कृतं स पदपाठस्य रचयिता। (वा च यः च इति च चकार शाकल्यः। यास्कः, नि.6.28) अनार्षे इति सूत्रशब्दः पदपाठं निर्दिशति। यतो हि सूत्रकारेण छन्दसि, ऋचि, यजुषि, ब्राह्मणे इत्येतानि पदानि प्रयुज्य यत् भाषायां नास्ति तेषां विधानं कृतम्। यत् तु केवलं भाषायामेव वर्तते, तेषां कृते भाषायामिति शब्दः प्रयुक्तः। संबुद्धौ शाकल्यस्येतावनार्षे इत्यस्मिन् सूत्रे तत्सादृश्यम् इति नञोऽर्थं स्वीकृत्य सूत्रकारेण अनार्षे इति पदं प्रयुक्तं यस्य पदपाठे विषयीभवति।



***प्रातिशाख्ये प्रगृह्यसंज्ञा***–ऋग्वेदप्रातिशाख्ये संज्ञापराणि अष्टौ सूत्राणि विहितानि। तेषु "ओकारः आमन्त्रितजः प्रगृह्यः" (ऋ. प्रा. 1.68), पदं चान्यः (ऋ. प्रा. 1.69) इत्येताभ्यां यत् प्रपञ्चितं तदेव संग्रहेण अन्यतमेन सूत्रेण उक्तम्-अपूर्वपदान्तगश्च (ऋ. प्रा. 1.70)। अनेन सूत्रेण एषो उषा अपूर्व्या (ऋ 1.46.1) इत्यत्र वर्तमानमेषो इति पदं प्रगृह्यसंज्ञकं भवति। पाणिनिना विहितेषु सूत्रेषु एकमपि सूत्रमस्य प्रगृह्यत्वं न साधयति।

पदकारेण तु इदम् इतिकारेण दर्शितम् 'एषो इति' इति। तर्हि पाणिनिसूत्रानुसारेण एषो इति समग्रस्य पदस्य प्रगृह्यत्वं कथं सिध्येत इति प्रश्नः। तत्र समाधानं प्रस्तूयते-सायणाचार्यस्य भाष्यमनु एतद् ज्ञायते यद् "एषा" इत्येवात्र पदं भवति, सन्दर्भेण इदं संगच्छते। "एषा एव अस्माभिः परिदृश्यमाना" इति सायणाचार्यो व्याख्याति। अतः "एषो" इति सांहितिके समुदाये "एषा उ" इति पदद्वयं स्यात्, ययोः उकारस्य निपात एकाजनाङ् (1.1.14) इति पाणिनीयेन सूत्रेण प्रगृह्यत्वं सिद्धम्। अचः परः प्रगृह्यः यथायथं सन्धिविकारमापद्यते अचि परे तु अविकृतो भवति। अतः एषा उ उषा इत्यत्र प्रथमो गुणसन्धिः प्राप्तः तत्तश्च उकारो प्रकृत्या। (अन्तादिवच्च 6.1.85) इत्यनेन ओकारस्य अचि परे उत्त्वं संपद्यते। पदकारेण तु एषो एवमेकं पदमवधार्य तच्च उषा इति उकारे परे संहितायां तस्य अविकृतत्वं दृष्ट्वा इतिकरणेन प्रगृह्यत्वं सूचितम्। पदानुसरिणा प्रातिशाख्येन तु तत् सूत्रितम्।

प्रातिशाख्ये विहितमन्यतमत् सूत्रं विमर्शमर्हति-तद्यथा "आर्ष्यां संहितायामितिकरणायोगाद्रक्तत्वं दीर्घत्वं प्रगृह्यसंज्ञत्वं च न भवति।" इति। संहितायामितिकरणं नास्ति अतः तत्र पदस्य प्रगृह्यत्वं नास्ति, इति सूत्रस्याशयः। अवेद्विन्द्र जल्गुलः (ऋ 1.28.1) इति मन्त्रांशोऽत्रोदाहृतः। अव। इत्। ऊँ इति। इन्द्र। जल्गुलः। इति पदपाठोऽत्र व्याकरोति। यण्सन्धिविकारमापन्नः उकारः पदपाठे इतिकरणेन युक्तः अनुनासिकः दीर्घः प्रगृह्यसंज्ञश्च भवति। इति विषयः कञ्चित् विचारमर्हति। उञः इति सूत्रे वार्तिककारो योगविभागं संसूचयति (उञ इति योगविभागः वा. 1, पा. सू. 1.1.18), येन ज्ञायते तत्पुरतः 'उञ ऊँ' इति एकं संयुक्तं सूत्रम्। योगविभागेन उञः शाकल्यस्य आचार्यस्य मतेन प्रगृह्यसंज्ञा भवति। शाकल्यग्रहणेन तत्र मतान्तरं ध्वन्यते यदितरेषामाचार्याणां मतानुसारेण न। तेन उकारस्य वैकल्पिकी प्रगृह्यसंज्ञासिद्धिः

येन सूत्रमिदं 'निपात एकाच् अनाङ् 1.1.14' इत्यस्य अपवादो भवति। (भाष्यकारेण प्रदीपोद्योतकाराभ्यां च योगविभागे इतौ अनार्षे इत्यस्यापि अनुवृत्तिः स्वीकृता। तद् इदमुदाहियते भाष्यकारेण 'उ इति, विति।' उञ इत्यत्र शाकल्यस्येतौ प्रगृह्यमिति अनुवर्तते, तत्र प्रगृह्यसंज्ञैव शाकल्यस्य मतेन विधीयते नान्येषामिति स्मृत्यन्तरानुसन्धानद्वारेण विभाषा संपद्यते इति कैयटः।) एवमपवादत्वात् वैकल्पिकं प्रगृह्यत्वं प्राप्तस्य उकारस्य 'मय उञो वो वा 8.3.33, इत्यनेन वकारादेशो भवति। (मयः उत्तरस्य उञो वा वकारादेशो भवति अचि परतः। प्रगृह्यत्वात् उञः प्रकृतिभावे प्राप्ते वकारो विधीयते।) इति सर्वमत्र योजनीयम्।

तैत्तिरीयप्रातिशाख्ये समग्रेण चतुर्थेन अध्यायेन विषयोऽयं विमृष्टः प्रग्रह इति नाम्ना। अत्रापि प्रग्रहसंज्ञा विशेषतः पदपाठानुसारिणी वर्तते। देवते उभे भागधे ऊर्ध्वे विशाखे शृङ्गे एने......। 4.11 इत्येकं बृहत् निपातसूत्रम्। यत्र तैत्तिरीयायां संहितायां वर्तमानानां पदानां साक्षात् परिगणनं कृतम्। सर्वाण्येतानि पदानि एदन्तानि अपि तु अवलोकिते मन्त्रांशे तत्र अच्सन्धिकार्यं न दृश्यते तद्यथा देवते समृद्ध्यै (तै. सं2.1.9), उभे सुश्चन्द्र (तै. सं. 4.4.4), भागधे भगधा अस्मै (तै. सं 2.5.6), ऊर्ध्वे समिधावा दधाति (तै. सं2.6.6.), विशाखे नक्षत्रम् (तै.सं. 4.4.10) इत्यादि। एवमेतादृशानां पदानां प्रगृह्यसंज्ञाकरणं पदपाठे इतिकरणसिद्ध्यर्थम्। सत्यपि इतौ परे अच्सन्धिविषयभाञ्जि पदानि न भवन्ति इत्यन्यो विषयः।

वाजसनेयिप्रातिशाख्यानुसारेण अच्प्रगृह्यसंज्ञको भवति। तद्यथा प्रगृह्यम् 1.92 इति संज्ञाविधायि अधिकारसूत्रम्। ततः एकारेकारोकाराः द्विवचनान्ताः। (1.93), ओकारश्च पदान्तेऽनवग्रहः। (1.94), उकारोऽपृक्तः। (1.95) इत्येतैः सूत्रैः वर्णानां प्रगृह्यत्वं विहितम्, अपि 'च चमू अस्मे त्वे' (1.96), 'मे उदात्तम्' (1.97) इत्येताभ्यां पदेषु अपि संज्ञेयं व्यापारिता। इदं प्रगृह्यं स्वरे परतः प्रकृत्या भवति इति संज्ञाकार्यविधायि सूत्रं विहितम्, प्रगृह्यं स्वरे 4-88 इति।

अत्र सविनयं विमर्शार्थमेव प्रस्तूयते मया-यत् प्रातिशाख्यानां पदपाठदृष्टीनां प्रगृह्यसंज्ञा इतिकरणप्रयोजना। (प्रकृत्येतिकरणादौ प्रगृह्याः। ऋ.प्रा.2.51) यद्यपि न केवलं पदे इतौ परतः अपितु संहितायामपि अचि परतः प्रगृह्यं प्रकृत्या भवति, इत्युक्तं तत्र (स्वरेषु चार्थ्यम् ऋ. प्रा.2.52), तथापि येषां पदानां पुरतः अच्प्राप्तिः



नास्ति, तेषामपि प्रगृह्यविधाने यावान् प्रपञ्चः कृतः तेन ज्ञायते पदपाठे इतिकरणमिति प्रगृह्यसंज्ञायाः महत्कार्यम्, अचि प्रकृतिभावः इति अवान्तरम्। इतौ परतोऽपि पदपाठे एते प्रगृह्याः सत्यपि संभवे अविकृताः तिष्ठन्ति। संहितायाः पदप्रकृतित्वात् तान्येव पदानि संहितायामपि प्रगृह्यसंज्ञकानि भवन्तु इति धिया विहिता दृश्यते तेषां प्रगृह्यसंज्ञा। पाणिनिमतानुसारेण प्रगृह्यसंज्ञा अच्सन्धिविषयिणी। संहितानां भवतु वा पदपाठे भवतु वा भाषायां भवतु वा यत्र सत्यपि संभवे अचि परतः अजन्तं किमपि पदमविकृतं भवति, तत् पाणिनिना संज्ञाविषयं कृतम्। शब्दशास्त्रेऽस्मिन् शब्दस्य रूपं महत्त्वम् आवहति, यत्र यत्र अर्थवशाद् वा सन्धिवशाद् वा तत् परिवर्तते, स स व्याकरणविषयः। सर्वं तत् नियमापन्नं कृतम् महता प्रयत्नेन पाणिनिना। एवम् अच्सन्धिनियमानामपवादत्वेन प्रगृह्यसंज्ञा विशेषतो विमृष्टा दृश्यते।

एवं संगृह्यते पाणिनिप्रातिशाख्ययोः प्रयोजनभेदः प्रगृह्यसंज्ञाकरणे।

## सन्दर्भाः

1. ऋग्वेदप्रातिशाख्यम्–उवटभाष्यसहितम्. संपा. डॉ. वीरेन्द्रकुमार वर्मा
प्रकाशक - काशी हिन्दू विश्वविद्यालय संस्कृत ग्रन्थमाला, 1970
2. शुक्लयजुर्वेदप्रातिशाख्यम्- अथवा वाजसनेयि-प्रातिशाख्यम्।
सम्पादक - डॉ. वीरेन्द्रकुमार वर्मा, प्रकाशक - ज्ञान प्रकाश प्रतिष्ठान, सी.के 1/12 गंगामहल. पटनी; वाराणसी, 1975
3. The Taittiriya Pratisakhya, with the commentaries Tribhasya-ratna and Vaidikabharana, ed./by R.Sharma Sastri, K.Rangacarya, Pub. Motilal Banarsidas, Delhi, 1985
4. काशिका-पाणिनीयाष्टाध्यायीसूत्रवृत्तिः भाग-प्रथमः, द्वितीय; सम्पादक - आर्येन्द्र शर्मा, श्री खण्डेराव देशपांडे, श्री. द. गो. पाध्ये,
प्रकाशक - संस्कृतपरिषत्, उस्मानिया विश्वविद्यालय, हैद्राबाद, 1970
5. व्याकरणमहाभाष्यम्-भाष्यप्रदीपोद्योतेन च विभूषितम्
सम्पादक - वेदव्रतः स्नातकः सिद्धान्तशिरोमणिः
प्रकाशक - हरियाणा साहित्य संस्थान, गुरुकुलझज्जर, जिला रोहतक।

# संस्कृतप्रसारपरिषद्, आरा

## संक्षिप्तम् इतिवृत्तम्

- स्थापनातिथिः 22.2.1987
- निबन्धनसंख्या 424/1994-95
- कार्यालय : - संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम्, प्रकाशपुरी, आरा (बिहारः) 802301
- आरण्यकम् (अर्धवार्षिकं संस्कृतशोधपत्रम्, प्रतिवर्षं मार्च, सितम्बरमासयोः प्रकाश्यमानम्)
- पञ्जीकरणसंख्या - RNI 58951/94
- संस्कृतविदुषां सम्मानः (प्रतिवर्षं क्रियमाणः)। अथ सम्मानिताः विद्वांसः-

| | सम्मानवर्षम् |
|---|---|
| 1. पण्डित कमलाकान्त उपाध्यायः | 1988 |
| 2. पण्डित चन्द्रशेखर पाठकः | 1989 |
| 3. पण्डित सीताराम उपाध्यायः | 1989 |
| 4. पण्डित सभानाथ पाठकः | 1990 |
| 5. पण्डित रङ्गनाथ पाण्डेयः | 1990 |
| 6. पण्डित रामेश्वरनाथ पाठकः | 1992 |
| 7. पण्डित केदारनाथ शुक्लः | 1993 |
| 8. पण्डित जनार्दन मिश्रः | 1994 |
| 9. पण्डित रामनरेश त्रिपाठी | 1995 |
| 10. पण्डित रामनारायण पाण्डेयः | 1995 |
| 11. पण्डित रामप्रवेश त्रिपाठी | 1996 |
| 12. पण्डित गिरिजानन्दन मिश्रः | 1997 |
| 13. पण्डित अम्बिकादत्त त्रिपाठी 'व्यासः' | 1998 |
| 14. पण्डित डॉ. श्यामानन्द झा | 1999 |
| 15. पण्डित व्रजभूषण मिश्र 'आक्रान्तः' | 2000 |
| 16. पण्डित जगदीश्वर प्रसाद मिश्र 'नलिनः' | 2000 |
| 17. पण्डित जयानन्द मिश्रः | 2001 |
| 18. पण्डित वृन्दावन त्रिपाठी | 2003 |

- प्रकाशितानि - 12 पुस्तकानि (विवरणं शोधपत्रस्य पृष्ठभागे)
- संस्कृतकविगोष्ठी-संस्कृतविचारगोष्ठीनाम् आयोजनम्
- संस्कृतसम्भाषणशिविराणाम् आयोजनम्
- महाविद्यालय/उच्च-मध्य-प्राथमिकविद्यालयस्तरीय-संस्कृतप्रतियोगितानाम् आयोजनम्
- वर्ष 2000 तः 'अन्नपूर्णादेवीस्मारिका संस्कृतप्रतियोगिता' द्वारा प्रतियोगितापुरःसरं पुरस्कार-प्रमाणपत्रादिवितरणम्।
- संस्कृतवर्षम् (1999-2000) उपलक्ष्य केन्द्रसर्वकारस्य अनुदानेन संस्कृतशिक्षक-प्रशिक्षणवर्ग - 51 संस्कृतसम्भाषणशिविर-संस्कृतसङ्गम् (14 अप्रैल, 2000) इति संस्कृतसम्भाषण-अभियानसञ्चालनम्।



# वैदिकसृष्टिविद्याया वैज्ञानिकानुशीलनम्

पराम्बा श्रीयोगमाया

## 1. उपक्रमः

प्राकृतिकवस्तूनि मनसि स्वतः कुतूहलं सृजन्ति। कथं वृक्षस्य पत्रं हरिद्वर्णम्, कथं मयूरस्य पिच्छमम्लानवर्णं विभावितं, कुतः तस्योद्भवः, कुतो वा तस्य निवासस्थानभूतोऽयं ग्रहः, कुतः पुनः सूर्यस्तथा नक्षत्रमालां गृहीत्वा कथं वेदं विश्वं संगठितमिति प्रश्ना अनुसन्धानाय तथा प्रकृतेः रहस्योन्मोचनाय स्वाभाविका भवन्ति।

सृष्टिविषयकाः प्रश्नाः बहुशताब्द्याः प्रागेव मानवमनःसु समुद्वेलिताः। कणिकविज्ञानस्य (Particle Physics) प्रगतिमाध्यमेनाधुनिकविज्ञानिभिः विश्वोत्पत्तेः विषये कतिपयानि सैद्धान्तिकतथ्यान्युपस्थाप्यन्ते।

### (क) वेदविषयकं साम्प्रतिकमवधारणम्

इदानीं वेदविषये द्विविधा सरणिर्जनसामान्ये परिदृश्यते। प्रथमतः 'वेदे किं किं नास्ति!' अर्थात्, सर्वमेव वर्त्तते। अत आधुनिकविज्ञानमपि। द्वितीयतः 'किञ्चिदपि नास्ति!' मतस्यास्याशयः निरसनीयः। परन्तूभयविधं मतमांशिकं सत्यं प्रतिपादयति। प्रथममतस्य विवेचनायां तु स्वतः प्रश्ना उत्थिता भवन्ति-यथाधुनिकविज्ञानस्य स्वरूपं, किं वैदिकविज्ञानस्य स्वरूपं तथैवाथवा भिन्नम्? पुनः किं सृष्टितत्त्वस्य सम्भाव्यमाधुनिकं रूपं सर्वपुरातनवाङ्मये ऋग्वेदे वर्त्तते? यदि वर्त्तते तर्हि तस्य किं स्वरूपम्? आधुनिकतथ्येन सह तस्य कश्चित्समन्वयो वर्त्तते न वा? पुनर्यदि कश्चिद् भेदः वर्त्तते तर्हि कस्मिन् प्रसङ्गे?

### (ख) संक्षेपेण पौराणिकं मतम्

सृष्टेः प्रादुर्भावविषये सुस्पष्टं वर्णनं धर्मशास्त्रे पुराणे च वर्त्तते।

श्रीमद्भागवतमहापुराणानुसारं यदा प्रकृतेः साम्यावस्थायां क्षोभ उत्पद्यते तदा महत्तत्त्वमाविर्भवति, महत्तत्त्वादहंकारः, अहंकारादेकादश करणानि, पञ्च तन्मात्राणि तथा पञ्चभ्यः तन्मात्रेभ्यः पञ्चमहाभूतानि जायन्ते।[1] तदनन्तरं क्रमशः संसारस्य विकासः। पौराणिकं सृष्टितत्त्वं सांख्यदर्शनप्रधानम्।

### (ग) शोधलेखस्याभिमुख्यम्

तत्त्वदर्शिनां मतेन न किञ्चित् प्रादुर्भवति, अपितु रूपान्तरमात्रं प्राप्नोति। अतः गीतायामुच्यते-

**'नासतो विद्यते भावो नाभावो विद्यते सतः।'** (गीता- 2/16)

अर्थात्, असद्वस्तुनः सत्ता नास्ति तथा सद्वस्तुनोऽभावोऽपि नास्ति। तथापि कथं विश्वं, सूर्यस्तथा पृथिवीत्यादीनि जागतिकतत्त्वानि प्रादुर्बभूवुः इति विषय उत्कण्ठामुत्पादयति मनसि। अत्र ऋग्वैदिकभाववृत्तस्य तथाधुनिकसृष्टितत्त्वस्य सम्भावितः समन्वितसम्बन्ध उपस्थापनीयोऽस्ति।

## 2. आधुनिकं मतं तथा सृष्टितत्त्वम्

विश्वविज्ञानं तत एव सारपथे गच्छति यदा आइनष्टाइनः माध्याकर्षणशक्तेः कृते स्वकीयं तथ्यमाविष्कृतवान् (the theory of gravitation : the general theory of relativity)। विश्वस्यास्य स्थिरावस्थायाः परिकल्पनमसम्भवमेव। 1929 ख्रीष्टाब्दे Hubble नामकेन वैज्ञानिकेनास्य परिवर्तनशीलविश्वस्य चित्रं सुस्पष्टं कृतम्। विश्वं तदभ्यन्तरवस्तुभिः सह प्रसरणशीलमिति (expanding) तेनाविष्कृततथ्यस्य सरलार्थः।

प्रसरणकारणाद् विश्वस्य परिवर्तनं निश्चितम्। अतोऽतीतं विश्वं साम्प्रतिकविश्वतोऽपि भिन्नम्। पदार्थविज्ञानमाधारीकृत्यातीतं विश्वं समधिकघनत्वविशिष्टं (denser) तथोतप्तमासीदिति (hotter) वक्तुं शक्यते। आमेरिकीयवैज्ञानिकेन (George Gamow) महोदयेन तथ्यमिदमाविष्कृतं तथा च तथ्यमिदमाधृत्य तेन विश्वस्य प्रादुर्भावे महाविस्फोटस्य (the role of Big Bang) भूमिका स्वीकृतास्ति। 1929 ख्रीष्टाब्दे यदा 'Edwin Hubble' महोदयेन प्रसरणशीलविश्वस्य स्वरूपं सुस्पष्टं प्रतिपादितं तदा तेनैतदप्याविष्कृतं यच्छायापथाः परस्परं पृथग्भूता जायन्ते तथा च दूरस्थानां छायापथानां पश्चात्पदतायाः (recession) वेगोऽप्यधिकः



भवति। अस्य छायापथप्रसारस्य वेगः प्रतिनियुतालोकवर्षस्य कृते 50 किमी/सेकेण्ड। वेग एष आधुनिकविज्ञाने ध्रुवाङ्क इत्युच्यते।

Hubble ध्रुवाङ्कः=50 किमी/सेकेण्ड/$10^6$ Mpc(Mega Parallax Second)

### (क) सृष्टिविज्ञानसम्बन्धितानि मतानि

आधुनिकविज्ञाने सृष्टिविषयमधिकृत्य कतिपयानि मतानि परिदृश्यन्ते। यथा–

1. महाविस्फोटसिद्धान्तः (Big Bang Theory)
2. लाप्लाससिद्धान्तः (Laplace's Theory)
3. वैज्यकरसिद्धान्तः (Weizsacker's Theory)
4. 'जीन्स' सिद्धान्तः (Jean's Theory)
5. तरङ्गसम्बन्धी सिद्धान्तः अथवा ग्रहसम्बन्धी सिद्धान्तः (Tidal or Planetesimal Theory) इति।

### (ख) महाविस्फोटसिद्धान्तस्य (Big Bang Theory) परिग्रहणम्

महाविस्फोटसिद्धान्तस्य प्रारूपितमाद्यन्तं वैदिकमतेन सह किञ्चित् सादृश्यं नयति। एतदर्थमाधुनिकेषु सृष्टितत्त्वसिद्धान्तेषु महाविस्फोटसिद्धान्तः अत्र परिचर्च्यते। तथ्यमेतत् स्वीकृत्य यदि वयं चर्चिष्यामः तर्हि Gamow आविष्कृतस्योत्तप्त-महाविस्फोटस्य (Hot Big Bang) विपरिणाम एव साम्प्रतिकं विश्वप्रारूपमिति। महाविस्फोटरूपबिन्दोः एव प्रसारः प्रारब्धः। महाविस्फोटरूपा सा प्राथमिक्यवस्था इदानीमपि विश्वप्रसारणे कारणभूता। स्थानकालकावप्यस्मादेव जागतिकप्रसङ्गात् प्रादुर्बभूवतुः। सृष्टिक्षणे समयस्य मूल्यं शून्यमासीत् (t = 0) तथा च व्यावहारिककालः अनिर्वचनीय आसीत्।

### (ग) जागतिकवस्तूनां क्रमिकोत्पत्तिः

महाविस्फोटादनन्तरं सहसा बहुक्षुद्रं, बहूत्तप्तं तथादिशक्त्या (Primordial force) सुबहुघनत्वविशिष्टं विश्वमेकप्रकारेणाणुरूपेण परिवर्तितं जातमिति तथ्यं Steven Weinderg महोदयेन "The First Three Minutes"[2] इति स्वकीये पुस्तके लिखितम्। एतं वयमेकमग्निपिण्डमिति वक्तुं शक्ष्यामः। Lovell मतानुसारमादौ एकमग्निपिण्डसामीत् यस्मान्नक्षत्राणि (stars) तथा छायापथाः समुत्पन्नाः। प्रसरणशीलं

विश्वं परिलक्ष्यैतद् वक्तुं शक्यते यदेकदा समय आसीत् यदा विश्वं क्षुद्रातिक्षुद्रं बिन्दुमात्रमासीत् यस्य परिज्ञानाय 15 निखर्ववर्षाणि (1y x $10^9$) पश्चाद्गमनं काम्यम्।

**3. सृष्टितत्त्वविवेचने ऋग्वैदिकं भाववृत्तम्** (ऋ.10/190)

ऋग्वेदे सृष्टिविषयकाणि सूक्तानि दार्शनिकानीत्युच्यन्ते यथा-पुरुषसूक्तम् (ऋ.10/90) हिरण्यगर्भसूक्तम् (10/121) वाक्सूक्तम् (10/125) नासदीयसूक्तम् (10/129) इत्यादीनि। परन्तु एतानि व्यतिरिच्य ऋग्वैदिकं भाववृत्तं सृष्टिप्रक्रियाया एकं **सुस्पष्टं** चित्रं ददाति। भाववृत्तस्यार्थ एव भवति सृष्टिविषयकं विवेचनम्।[3] त्रिमन्त्रात्मकमतिक्षुद्रं सूक्तमिदं सृष्टिविषयकं गम्भीरं तत्त्वमुपस्थापयति।

**(क) सर्वप्रकाशमयतेजसः विश्वोत्पत्तिस्तथा प्रसारणम्**

भाववृत्तस्य प्रथमे मन्त्रे सर्वप्रकाशमयतेजसः विश्वोत्पत्तिः तथा स्वप्रकृत्यनुरूपं प्रसारणमित्युभयस्य संकेतः प्राप्यते।

**ऋतं च सत्यं चाभीद्धात् तपसोऽध्यजायत।**
**ततो रात्र्यजायत ततः समुद्रो अर्णवः।।** (ऋ.10/190/1)

अभीद्धात् तपसो अर्थात्, सर्वप्रकाशवता तपसा ऋतं सत्यं चाजायेताम्। तदनन्तरं रात्रिस्ता अर्णवसमुद्रः समुद्भूतोऽभूत्।

'ऋतं' शब्दः 'ऋ' (गतौ) धातुतः निष्पन्नताकारणाद् गत्यर्थकः।[4] 'सत्य' शब्दः 'अस्' (स्थितौ) धातोरुत्पन्नताकारणात् सत्ताया अथवा "स्थिरताया बोधकः; अतोऽस्तित्वस्य बोधकः।[5] 'रात्रिः' जड़तायाः अथवा विश्रामस्य प्रतीकभूता। तैत्तिरीयसंहितायां गतिस्तथा स्थिरता- इत्येतयोः समीकृतरूपा रात्रिः 'तमस्' इत्युच्यते।

**"तमो रात्रिः।"** (तै. सं-1/5/95)

अत्र यदि दार्शनिकदृष्ट्या विवेच्यते तर्हि सर्वादौ सत्त्वरजस्तमगुणयुक्तायाः प्रकृतेः उत्पत्तिः निश्चिता भवति। अर्थात्, स्थितितत्त्वस्य (Existence), गतितत्त्वस्य (Motion) तथा जड़तत्त्वस्य (Inertia) उत्पत्तिर्भवति। परन्तु आधुनिकविज्ञानदृष्ट्या यदि पश्यामः तर्हि मन्त्रस्य प्रारम्भे चर्चितं सर्वप्रकाशमयं तेजः महाविस्फोटं (Big Bang) संकेतयति। एतत् सर्वप्रकाशमयतेजः सर्वाधिकं घनत्वं तथोत्तापं संसूचयति



क्षणमात्रमपि भवतु सुबहुघनत्वविशिष्टबिन्दौ प्रथमतया स्थितितत्त्वं तदनन्तरं महाविस्फोटात् प्रसारणं (Expansion) भवति तथा तदेव गतितत्त्वं सूचयति। तदेव प्रसारणमद्याप्यव्याहतमस्ति। तत्र कारणं भवति जडतत्त्वं यदाधुनिकविज्ञानभाषया इत्युच्यते। निउटन्महोदयस्य प्रथमनियमादस्य 'inertia' तत्त्वस्य सम्यग् ज्ञानं भवेत्।[6]

ततोऽर्णवसमुद्रोऽर्थात्, ऊर्जारूपः महासमुद्रः (Ocean of Energy) समुद्भूतः। अनेन महासमुद्रेण शक्तेरानन्त्यं परिलक्षितं भवति यदाधुनिकविज्ञानसम्मतम्। यतः महाविस्फोटादुत्पद्यमाना प्रभूता शक्तिः सकलसृष्टेः कारणभूता तथा विश्वस्य सततप्रसारक्रियायामपि हेतुभूता। अस्या अनन्तशक्तेर्वर्णनमृग्वेदे 'सलिल' शब्देन (10/129/3) तथा 'अदिति' शब्देन (unbroken/entire) क्रियते। अर्णांसि सन्ति यस्मिन् स अर्णवः[7] इति। 'अर्णः' शब्दस्य निष्पत्तिर्गत्यर्थकात् 'ऋ' धातुतो भवति। एतत् सुस्पष्टं यद् गतिशीलतत्त्वानां समूह एवार्णवः। गतिशब्द अत्र शक्तेः प्रतीकः। यतः शक्तिं विना गतिः असम्भवा। अतोऽर्णवशब्दस्यार्थ ऊर्जाथवा शक्तिर्भवति तथार्णवसमुद्रः ऊर्जायाः समुद्र इति (Ocean of Energy)। कस्या अपि क्रियायाः सम्पादनार्थमूर्जाया आवश्यकता वर्त्तते। सृष्टेर्विनिर्माणन्तु बहुव्यापकं कार्यम्। अत ऊर्जायाः समुद्र अपेक्षितोऽत्रार्थात्, ऊर्जाया अपरिमितः राशिः आवश्यको भवति।

**(ख) (i) स्पन्दनक्रियया दोदुल्यमानावस्थायाः संकेतः** (Oscillatory state)

द्वितीयमन्त्रस्य प्रथमे कस्याश्चित् स्पन्दनक्रियायाः वर्णनाद् विश्वस्यास्य प्राथमिकी दोदुल्यमानावस्था (Oscillatory state) सूचिता भवति यथा-

**समुद्रादर्णवादधि संवत्सरो अजायत।** (ऋ10/190/2)

अर्थात्, तस्मादर्णवसमुद्रात् संवत्सरः समुत्पन्नोऽभूत्। जैमिनीयब्राह्मणे संवत्सरशब्दस्यार्थ एवंरूपेण सुस्पष्टः-"असौ एव संवत्सरो योऽसौ तपति। तस्य यद् भवति तत् संवद् यन्मध्ये कृष्णं मण्डलं वत्सर इत्यधिदैवतम्।"(जै. ब्रा.2.20)

अर्थात्, यः तपति सः संवत्सरः। यः तेजोदीप्तः सः संवत्। मध्ये यत् कृष्णमंण्डलं सः सरः। अतः तेजः शुक्लतायाः अथवा वृद्धेस्तथा कृष्णमण्डलं कृष्णस्याथवा क्षयस्य सूचकम्। वृद्धिक्षयौ उत्थानपतनयोः द्योतकौ। उत्थानपतनाभ्यां स्पन्दनक्रियाभीष्टा। स्पन्दनक्रियां विना नास्ति वृद्धिक्षययोः अथवोत्थानपतनयोः

सम्भावना। 'सृ' (गतौ) धातुतो निष्पन्नः 'सत्र' शब्दः स्वाभ्यन्तरेऽन्तर्निहिताया गतेः सूचकः। अतः 'संवत्सर'शब्दात् स्पन्दनक्रियायाः प्रारम्भः सम्भाव्यते। आधुनिकविज्ञानमवस्थामेतां Oscillatory state दोदुल्यमानावस्थेत्याख्यापयति।

### (ख) (ii) शुक्लकृष्णतत्त्वद्वयस्य सृष्टिः

मन्त्रस्य द्वितीये पादे शुक्लकृष्णतत्त्वद्वयस्य सूचनं भवति। अनेन एताभ्यां सहाधुनिकविज्ञानप्रतिपादितं Iuminous तथा non-Iuminous matters - इत्येतद् द्वयं तुलयितुं शक्यते। यथा-

**अहोरात्राणि विदधद्विश्वस्य मिषतो वशी।।** (ऋ10/190/2)

'वशी' शब्दः कान्त्यर्थकाद् 'वश्' धातुतो निष्पन्नो भवति ('वश्' कान्तौ, धातुपाठः, अदादिगणः): अनेन शक्तिरूपेण अहोरात्राणि विधृतान्यासन्। सामान्येऽर्थे 'अहोरात्राणी'त्यस्यार्थः दिवसा रात्र्यश्च। परन्त्वत्र न स एवार्थः। यतः तदानीं तु सूर्यादयः अव्युत्पन्ना आसन्। दिवारात्र्योः का कथा? मैत्रायणीसंहितानुसारं यत् शुक्लत्वं तदह्नः तथा यत् कृष्णत्वं तद् रात्रेः रूपम्।

**यच्छुक्लं तदह्नो रूपं यत्कृष्णं तद्रात्रेः।** (मै. सं.3/6/6)

ऊर्जायाः समुद्भूतकारणादह्नः प्रकाशयुक्तमर्थात् तस्मिन्नालोकविकाशकारिणी क्षमता वर्त्तते। आधुनिकविज्ञानमतेन पिण्डमेतं Iuminous matters इति वक्तुं शक्यते। 'रात्रि' शब्देन यस्मिन्नालोकविकाशकारिणी क्षमता नास्ति स एव पिण्डः सूचितो भवति। वस्तुतः अनेन पिण्डेन non-Iuminous वस्तु संकेतितं भवतीति वक्तुं शक्यते।

### (ग) ग्रहनक्षत्राणां संसृष्टिः

सूक्तस्यास्य तृतीये मन्त्रे क्रमशः नक्षत्राणां तथा ग्रहाणां सूचनं भवति। यथा-

**सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्।** (ऋ10/190/3)

अत्र सूर्यचन्द्रमस्-शब्दाभ्यां साम्प्रतिकयोः सूर्यचन्द्रमसोः ग्रहणं न भवति। यास्काचार्येण सूर्यशब्दस्य व्युत्पत्तिस्तु एवं कृतास्ति-"सूर्यः सर्तेर्वा। स्वीर्यतेर्वा।"(नि.12.10)

एवंरूपेण गतियुक्तः पिण्डः सूर्यः। सूर्यः प्रकाशमानस्तथा गतियुक्तः। 'चन्द्रमस्' शब्देनात्रान्धकारयुक्तपिण्ड अभिप्रेतः। ब्राह्मणग्रन्थः "रात्रिर्वै चन्द्रमा" (मा.श.12/



4/4/7) इत्युक्त्वा तथ्यमेतत् सम्पोषयति। एषः अन्धकारयुक्तः पिण्डोऽपि गतियुक्तो भवति। यतः 'चन्द्र' शब्दः 'चण्' ('चण्' गतौ, धातुपाठः, भ्वादिगणः तथा 'द्रुम्' (दुम् गतौ, धातुपाठः, भ्वादिगणः) इति धातुभ्यां भवति। अतः सूर्यशब्देन निजस्वालोकयुक्ताः प्रकाशपिण्डा अर्थात्, नक्षत्राणि तथा 'चन्द्रमस्' शब्देन निजस्वालोकविहीना अन्धकारमयपिण्डा अर्थात् ग्रहा एव संसूचिताः भवन्ति।

### (घ) सूर्यपृथिव्याकाशादीनां सूचना

ग्रहनक्षत्राणां सामान्यसूचनाया अनन्तरं निर्दिष्टरूपेणास्माकं सौरजगता सह सम्बन्धितानां सूर्य-पृथिव्याकाशादीनां सूचना मन्त्रे प्राप्यते। यथा-

**दिवं च पृथिवीं चान्तरिक्षमथो स्वः।** (ऋ.10/190/3)

'द्यु' शब्दः ('दिवु' क्रीडा........द्युति........धातुपाठः, दिवादिगणः) द्योतनार्थे भवति। यतः पूर्वपादे सामान्यतया नक्षत्राणां संकेतोऽवाप्यते, अस्मिन् पादे निर्दिष्टरूपेणास्माकं सौरजगतः आधारभूतः सूर्यः सूचितो भवति। एवमपि 'पृथिवी' शब्देन निर्दिष्टरूपेणास्माकं निवासस्थानस्य पृथिवीलोकस्य ग्रहणं भवति। 'अन्तरिक्ष' शब्दस्यार्थः भवति वायुमण्डलम्(atmosphere)।[8] 'स्वः'शब्दस्यार्थः भवति स्वर्गः अर्थात्, वायुमण्डलरहितं सूर्यस्योपरिस्थमाकाशमथवा पृथिवीसूर्ययोर्मध्यस्थमाकाशम्।[9] वायुमण्डलयुक्ताकाशस्य पृथक्सूचनकरणाद् वायुमण्डलरहितस्य महाकाशस्याप्यन्ते सूचनं भवति। अन्यथा महाकाशं तु सर्वदा सर्वत्र विद्यमानमस्ति।

अत्रैतदपि स्पष्टीकरणीयं यदृग्वेदानुसारं सृष्टिं सुव्यवस्थितां कर्तुं सर्वशक्तिमत्तायाः सत्तायाः योगदानं वर्त्तते। एतत् सूक्तस्यान्तिमे मन्त्रे प्रदत्तेन 'धाता' शब्देन प्रमाणितं भवति।

भाववृत्तस्य तथाधुनिकविज्ञानस्य सृष्टिक्रमः तुलनात्मकदृष्ट्या वयमेवमुपस्थापयितुं क्षमाः।

| **ऋक्.10/10** | **सांकेतिकार्थः** | **सम्भावितमाधुनिकविज्ञानम्** |
| --- | --- | --- |
| अभीद्धं तपः | सर्वप्रकाशमयतेजः | Big Bang |
| ऋतं,सत्यं,रात्रिः | गतिः, स्थितिः, जड़ता | Expansion,Existence,Inertia |
| समुद्रो अर्णवः | ऊर्जायाः महासमुद्रः | Ocean of Energy |

| | | |
|---|---|---|
| संवत्सरः | स्पन्दनक्रिया | Oscillatory state |
| अहोरात्राणि | शुक्लत्वं तथा कृष्णत्वं/ स्वकीयालोकविकाशकारी पिण्डस्तथा स्वकीयालोक- विकाशशक्तिरहितः पिण्डः | Luminous & Non-Iuminous matter |
| सूर्यचन्द्रमसौ | प्रकाशमयान्धकारमयपिण्डानि | Stars & Planet |
| द्यौः | निर्दिष्टरूपेणस्माकं सौरमण्ड- लस्य सूर्यः | Particularly the Sun |
| पृथिवी | निर्दिष्टरूपेणास्माकं निवास- लोकभूतः ग्रहः | Particularly the Earth |
| अन्तरिक्षम् | वायुमण्डलम् | Atmosphere |
| स्वः | वायुमण्डलरहितः आकाशः | Heaven/the space between the sun and Earth's atmosphere/ inter-stellar space(vacuum) |

**4. भेदः**

परन्त्वाधुनिकं विज्ञानं न कस्या अपि भिन्नसत्तायाः अस्तित्वमथवा प्रभावं स्वीकरोति। येन प्राकृतिकनियमेन समग्रं विश्वप्रपञ्चं प्रचलति स एव नियमस्तेषां कृते सर्वातिशायी। एकः प्रश्नो मनसि भवति-महाविस्फोटाय सुबहुघनत्वं तथा उत्तापः कुतः आगते? विज्ञानिभिः एतस्मिन् विषयेऽनुसन्धानं करणीयम्।

पुनर्भेदस्यापरमेकं कारणं भवति-आधुनिकविज्ञानं केवलं यदा प्रत्यक्षप्रमाणे विश्वसिति तदा वैदिकविज्ञानं प्रत्यक्षानुमानोपमानादीनि दर्शनशास्त्रानुमोदितानि प्रमाणानि तत्त्वानां विकाशाय सन्निवेशयति।

**5. सादृश्यम्**

भाववृत्तस्यास्यान्तिमे मन्त्रे 'यथापूर्वम्' शब्दः संसूचयति यदेषा सृष्टिः नादिसृष्टिः। अस्याः प्रवर्त्तमानायाः सृष्टेः प्रागपि समावस्थापन्ना सृष्टिरासीत्। पुनरेतदनन्तरमपि सृष्टिः विनिर्मिता भविष्यति। अर्थात्, प्रतिकल्पं सृष्टिनिर्माणप्रक्रिया समानैव।



एषैका चक्रात्मिका प्रक्रिया (cyclic)। तथ्यमेतदत्र समानतां नयति आधुनिकविज्ञानेन सन्दर्शितेन 'Big Bang'[10] इत्यनेन सह। यथा सर्गस्तथा प्रतिसर्गः तथैव Big Bang (महाविस्फोटं) तथा Big Crunch इति। वैदिकस्य तथाधुनिकविज्ञान-स्येत्युभयस्य मतानुसारं सृष्टिरेषा दशनिखर्ववर्षात्मिका पुरातना।

**6. उपसंहारः**

तुलनात्मकपरिशीलनादेतत् सुस्पष्टं भवति यदाधुनिकविज्ञानमादिसृष्टिं न संसूयचयति। अन्यथा महाविस्फोटायोपादानानि कुत एकत्र बभूवुः? आदिसृष्टिं विहायान्या काऽपि सृष्टिः Big Bang तथा Big Crunch इति तत्त्वद्वयेन प्रतिपादयितुं शक्यते। परन्तु वैदिकं सृष्टितत्त्वमादिसृष्टेः कृते तद्भिन्नानां कृतेऽपि सैव। यतः 'धाता' शब्दे विज्ञानं प्रश्नं करिष्यति तर्हि किं तत्र प्रमाणम्?

समाधानाय दर्शनशास्त्रमाश्रियते यतो हि वैदिकसृष्टितत्त्वं दर्शनप्रधानम्। दृष्टान्ताय दर्शनशास्त्रे आत्मा पदार्थस्य प्रथमे भेदे द्रव्ये एव गृहीतः भवति।[11] पुनस्तस्य द्वयोः भेदयोः जीवात्मपरमात्मनोः प्रत्यक्षेऽनुमानमेव प्रमाणमिति नैयायिका आमनन्ति। आधुनिकविज्ञानं जीवात्मपरमात्मनोः तथ्यभित्तिकं प्रमाणमेकदा न प्रत्यक्षीकरिष्यतीत्यपि पूर्णतया निराकर्त्तुं न शक्यते। पारस्परिकसहयोगेन (विज्ञानिनां तथा संस्कृतज्ञानां) तथा दार्शनिकतत्त्वनां साहाय्येन यदि प्रयुक्तिविद्यायाः कश्चिन्नूतनायामः समुद्भावितः स्यात् तर्हि कदाचिद् वैदिकातिजागतिकतत्त्वानां प्रत्यक्षीकरणं सम्भवेत्।

## सन्दर्भाः


1. अव्याकृतगुणक्षोभान्महतस्त्रिवृतोऽहमः।
   भूतमात्रेन्द्रियार्थानां सम्भवः सर्ग उच्यते।।
   (श्रीमद्भागवतमहापुराणम् 12/7/11)
2. The First Three Minutes, Steven Weinberg Nobel laureate, Flemingo Books, New York, 1976
3. भावो भवनं सृष्टिस्तत्र वृत्तः प्रवृत्तो भाववृत्तः, निरुक्तम्,दुर्गभाष्यम्. पृ.सं.344
4. वैदिक कोश, भाग 1, पृ. सं. 369
5. वैदिक कोश, भाग 3, पृ. सं. 1410
6. Newton's 1st Law-A body at rest remains at rest and a body in motion remains in motion when no external force is acting it.
7. संस्कृत-हिन्दी-कोश, पृ. सं. 52
8. संस्कृत-आंग्लो-शब्दकोशः, पृ. सं. 27
9. संस्कृत-आंग्लो-शब्दोकोशः, ('स्वर' शब्दः) पृ. सं. 631
10. A Brief History of Time (From the Big Bang to Black Holes) Pp. 121-49
11. तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव।




# वैदिकवाङ्मये नारीणां दशाविमर्शः

**वैद्यनाथ मिश्रः**

स्त्रियः खलु नृणां शक्तिः विधातुरपरा सृष्टिरिति। ताभिर्विना नराणां लोकयात्रा नैव सम्भाव्यते। पृथिव्याः प्रगतेश्चाधाररूपा इयं 'नारी' नामरूपा जातिः। आदिकालादेव सामाजिकसंरचनायां स्वभूमिकामावहन्त्यः स्त्रियः पुरुषाणां चेतसि कर्मकर्तृत्वभावनाया आधानं कुर्वन्त्यश्च दृश्यन्ते। वैदिकवाङ्मये तासां जीवनदर्शनस्य सामाजिककर्मणश्चातिविस्तृतं वर्णनमस्माभिर्लभ्यते।

**सामाजिकदशाः**–वैदिक-समाजे स्त्रीणां स्थानमतिमहत्त्वपूर्णमिति नास्ति सन्देहः। परिवारस्य चतुर्मुखिप्रगतये नार्यस्तु धूरूपाः भवन्ति स्म। तस्याः मार्गदर्शनेनैव गृहस्य समग्रसञ्चालनं परिचलति स्म। धार्मिक-सांस्कृतिक-सामाजिक-कार्येषु तस्या इच्छा सर्वोपरि आसीत्। गृहसञ्चालिकायाः स्त्रियाः आज्ञोल्लघनं पुरुषैरपि न क्रियते स्म। पितुर्गृहादागमने सति सा सर्वेषां गृहजनानां कृते साम्राज्ञीरूपेण आदृता भवति स्म–

**यथा सिन्धुर्नदीनां साम्राज्यं सुषुवे वृषा।**
**एवं त्वं समाज्ञ्येधि मत्युरस्तं परेत्य।।** अथर्ववेदः 14.1.43

अस्मिन् काले स्त्रीणां निर्देशेनैव पुरुषाः सामाजिक-पारिवारिक-धार्मिक-कार्याणि कुर्वन्ति स्म। भोजन-वस्त्र-शयन-शय्याभूषण-गृहनिर्माण-वरचयनादिकर्मसु स्त्रिया इच्छा बलीयसी आसीत्। गृहे उपविश्यैव शासनतन्त्रं सञ्चालयन्त्योऽपि स्त्रियः कदापि निरंकुशाः नैव भवन्ति स्म। वैदिक्यः वामाः गृहाद् बहिः निर्गमनकाले अवगुण्ठनयुक्ताः भवन्ति स्म। पितृसत्तात्मकव्यवस्थायामपि नार्याः सर्वाधिकं महत्त्वम् आसीत्। अस्मिन् काले नार्यः माता, पुत्री, पत्नी चेति रूपेण पूजार्हाः। दुग्धदोहनस्य कर्मत्वाद् दुहिता कथ्यते पुत्री। पितुः गृहाद् दूरवासिनी भवेत्कन्या इति वैदिकी धारणा आसीत्–

- दुहिता दूर्हिता दूरे हिता।

आर्याणां दृष्ट्या पुत्रः पुत्री च द्वावेव तुल्यौ। तत्र अस्मिन् प्रसङ्गे दृष्टिभेदः नासीत्। आर्यास्तु पुत्रीप्राप्तिहेतुः 'पूषा' देवताया आराधनामपि कुर्वन्ति स्म। कन्यास्तु दवी-तुल्याः भवन्ति स्म। पुत्राभावे सर्वसम्पत्त्यधिकारिणी पुत्री एव भवति स्म। ऋग्वेदे मातुरङ्के सुप्तयोः भगिन्योः मार्मिकं वर्णनं विद्यते। अस्मिन् काले भगिनीनां कृते बहुसम्मानो दीयते स्म। यस्य भ्रातुः भगिनी भवति स तु सौभाग्यशाली भवति। भ्रातृहीनायाः कन्यायाः वैवाहिककर्मणि बाधा भवति स्म। **भ्रातृहीनायाः कन्यायाः** यदि पुत्रः स्यात् सः **पुत्रः** मातृकुलं गच्छति स्म। **भ्रातृहीनानां कन्यानां जीवनं** कष्टमयं भवति स्म–

अभ्रातरो न योषणो व्यन्तः। ऋ. 10.45.47

अभ्रातर इव जाययस्तिष्ठन्तु हतवर्चसः अथर्ववेदः 1.17.1

भ्रातृभगिन्योर्मध्ये स्नेहः स्यादिति अपेक्षितः आसीत्–

**मा भ्राता भ्रातरं द्विक्षन् मा स्वसारमुत स्वसा।** (अथर्ववेदः 3.30.3)

**नारीशिक्षा**–वेदकालीनानां नारीणां कृते शिक्षायाः व्यवधानं नासीत्। **स्त्रीणामुपनयनसंस्कारोऽनिवार्यः।** बालास्त्वाश्रमं गत्वा गुरुभ्यः वेदादीनां सम्यगध्ययनं कुर्वन्ति स्म। गार्गी, मैत्रेयी, घोषा, अश्ववारा, रोमशा, इन्द्राणी, अपाला, शची, लोपामुद्रा प्रभृत्यः स्त्रियः प्रमाणत्वेन गण्यन्ते। स्त्रियोऽपि वेदाध्ययनस्य अधिकारिण्यः आसन्। हारीतसंहितायां स्त्रीणां विभागद्वयस्य चर्चा अस्ति। प्रथमस्तावत् ब्रह्मवादिनी द्वितीयश्च सद्योवाहः एतौ विभागौ नारीणां कर्तव्यक्षेत्राधारितौ स्तः। तत्र ब्रह्मवादिनी वेदाध्ययनेन सह परिवारपरिपालनाय भिक्षामपि याचते–

द्विधा स्त्रियो ब्रह्मवादिन्यः सद्योवाहाश्च। तत्र ब्रह्मवादिनीनामग्नीधनं वेदाध्ययनं स्वे गृहे च भैक्षचर्येति। (हारितसंहिता)

**पत्नीस्थानम्**–परगृहादागतायै नववध्वै बहुसम्मानो दीयते स्म। तत्र तु जाया कल्याणी सुषमामयी इत्यादिनाम्ना व्यवह्रियते स्म–

**कल्याणी** जाया सुरणं गृहेते, **जायेदस्तं मघवन सेदुयोनिः।** अथर्ववेदः-3.53.4

वैवाहिकबन्धनं प्रधानतमं सामाजिकं कर्म आसीत्। आर्यास्तु भार्यामेव गृहं



मन्यन्ते स्म। दम्पतीभ्यां मिलित्वा धार्मिकमनुष्ठानं क्रियते स्म। श्रौतसूत्रे लिखितम् अस्ति-"इदं मन्त्रं पत्नी पठेत्" जाया, पत्नी, भार्या, वामा, दयिता इत्यादीनि नामानि तासां गुणाश्रितानि भवन्ति। कन्यायाः जीवनं सुखमयम् आह्लादमयं स्यादिति विचार्य वधूपक्षेण वरपक्षाय प्रचुरं द्रव्यं दीयते स्म। विवाहात्पूर्वं वरस्य कुलीनतां, शिक्षां, चरित्रं, आर्थिकदशां च वीक्ष्य एव तस्मै कन्यादानं दीयते स्म। शिक्षितायै कन्यायै योग्यः वरः सौलभ्येन प्राप्यते स्म–

**ब्रह्मचर्येण कन्या युवानं विन्दते पतिम्।** (अथर्ववेदः)

आर्याणां दृष्टिपथे पुत्रेण सह पुत्री अपि शिक्षायाः समानाधिकारिणी आसीत्। ऋग्वेदीयवैवाहिकमन्त्रैः परिज्ञायते यत् तत्र बालविवाहः वर्जितः आसीत्। पूर्णयौवना, पतिकामा बाला एव पत्नीपदस्य अधिकारिणी भवति स्म–

**सोमो वधू यूरवदश्विना ता उमा वरा।**
**सूर्या यत् पत्ये शंसन्तीं मनसा सविता ददात्।।** (ऋ.10.85.09)

वेदकालीने समाजे विधवानां पुनर्विवाहस्य प्रचलनमासीत्। ऋग्वेदे अस्य वर्णनम् अस्ति–

**इमां त्वमिन्द्रः मीढव सुपुत्रां सुभगां कृणु।**
**दशास्यां पुत्रानाधेहि पतिमेकादशं कृधि।।** (ऋ.10.85.45)

तत्र भ्राता-भगिन्योर्मध्ये विवाहनिषेधः आसीत्। ऋग्वेदस्य यम-यमी-संवादेनापि इदं ज्ञायते। बहुविवाहः सर्वसाधारणेन अस्वीकृतः परन्तु सम्पन्नवर्गेण बहुविवाहः क्रियते स्म।

**नारीवीरता**–कालोऽयं लुण्ठकैश्चौरैश्च प्रभावित आसीत्। जनसंख्याविरलत्वादेतेभ्यश्चौरादिभ्यः भयं सर्वत्र आसीत्। आर्याणामनार्यैः सह प्रायशः युद्धं भवति स्म। ऋग्वेदस्य दशमे मण्डले अस्यातिविस्तरेण वर्णनं समुपलभ्यते। कालेऽस्मिन् न केवलं पुरुषाः अपितु स्त्रियोऽपि युद्धक्षेत्रं गत्वा यौद्धिके कर्मणि सहयोगितामावहन्ति स्म। विश्चला नाम स्त्री स्वपत्या सह युद्धं कर्तुं युद्धक्षेत्रं गता आसीत्। युद्धं कुर्वन्ती पादेन खञ्जा जाता। तस्याः पुरुषवद्वीरत्वं प्रपश्य अश्विनीकुमाराभ्यां तस्य पादस्य शल्यक्रियां कृत्वा पूर्ववत् तत्संयोजितः। वृत्रासुरस्य जननी 'हनू' अपि

स्वपुत्रेण वृत्रासुरेण सह युद्धभूमिं गत्वा इन्द्रवैरुध्यं युध्यमाना वीरगतिं-प्राप्तवती-

**नीचावया अभवद् वृत्रपुत्रेन्द्रो अस्या अव वधर्जभार।**

**उत्तरा सूरधरः पुत्र आसीद् दानुः शये सहवत्सा न धेनुः।।** ऋ.10.32.09

**नारीसौन्दर्यम्**–वेदकालिकसमाजे लावण्यमयी स्त्री सर्वैरेव काम्यते स्म। तत्र नारी सुन्दरी, सुचरित्रा, दर्शनीया स्यादिति पुरुषैः अभीष्टम्। वैदिककवयः विविधमन्त्रेषु नारीणां रमणीयसौन्दर्यस्य वर्णनं कृतम्। स्त्रीणामङ्गानि कीदृशानि स्युरिति तत्र विवृतानि विविधमन्त्रैः। स्त्रीणां बाहु-कटि-केश-नाभिदन्तादीनां दशानां वर्णनं यत्र-तत्र लभ्यते यथा–

**एवमेव हि योषां प्रशंसन्ति पृथुश्रोणिर्विमृष्टान्तरासामधये संग्राहयति।**

(श.ब्रा. 1.2.5.16)

पुष्पादिभिः रूपसज्जा, केशवर्धकौषधप्रयोगः, विविधपरिधानप्रयोगः, विविधवर्णानां कुङ्कुमादिप्रयोगः, नारीसौन्दर्यवर्धकतत्त्वानां वर्णनं वेदेषु विद्यते। महर्षिजमदग्निः एकामेतादृशीमोषधिमाविष्कृतवान् यस्य प्रयोगेण तस्य तनुजायाः केशाः भुजद्वयाकारपरिमिताः जाताः–

**अमी शुना मैया आसन् व्यामेनानुमेयाः। केशाः नग एवं**

**वर्धन्तां शीर्ष्णस्ते असिताः परि।** (अथर्ववेदः 6.136.2)

ऋग्वेदे उषोनार्याः सौन्दर्यवर्णनं नयनाभिरामं विद्यते। स्वर्णरथारूढायै उषः कन्यायै वैदिकर्षिणा सौन्दर्याभिवर्धकपदावलीनां सुष्ठु प्रयोगैः तस्याः लावण्यवर्णनं नितरां मनोहारि क्रियते–

**उषो देव्यमतां विभाहि चन्द्ररथा सुनृता ईरयन्ती।**

**आ त्वा वहन्तु सूयमासो अश्वा हिरण्यवर्णा पृथुपाजसो ये।।** (ऋ.6.61.2)

वेदकालीनाः स्त्रियः विविधैराभूषणैः स्वसौन्दर्यवृद्धिः क्रियन्ते स्म। आभूषणप्रयोगैः तासां कौलीन्यं, सौम्यता, भद्रता, समृद्धिश्च ज्ञायते स्म। स्त्रियः शयनविदग्धाः, नीरोग्यः, सुवस्त्राः, स्मितवदनाः, सुरूपिण्यः, निरश्रवः, पुरुषैरपेक्ष्यन्ते स्म। लज्जा मन्दवाणी च नारीणां परमाभूषणत्वेन गण्येते स्म। ताभिः परपुरूषेषु दृष्टिविक्षेपः नैव कर्तव्यः। परपुरुषाणां वचनान्याकर्ण्य अपि तदुपरि ध्यानं नैव दातव्यम् इति नारीशिक्षा-



**अधः पश्यस्व मोपरि सन्तरां पादको हर।**

**मा ते कश प्लकौ दृशन्त्स्त्री ब्रह्म बभूव विथ।।** (ऋ.8.43.19)

वैदिक्यः ललनाः सूत्रनिर्माणं, वस्त्रवयनं, रूपसज्जादिकं कर्म जानन्ति स्म। ताभिर्निर्मितानि वस्त्राणि बहुवर्णमयानि स्वर्णमण्डितानि, विविधाकृतिखचितानि च भवन्ति स्म। धार्मिककृत्यावसरे दम्पतीभ्यां 'पेशसू' नामधेयस्य वस्त्रस्य प्रयोगः क्रियते स्म। तस्मिन् काले स्त्रीणां मध्ये चतुर्विधं केशरचनाप्रकारं प्रसिद्धमासीत् तद्यथा-चतुष्कपर्दं, ओपशं, कुम्बं, कुरीरञ्चेति। वेदबालाः विविधवर्णाकृतिप्रसूनप्रयोगैः कुर्वन्ति स्म कण्ठे, पादयोः, करयोः च पुष्पवलयानि धारयन्ति स्म।

**नारी-सम्मानः**–गृहस्थजीवने नार्य्यः धूरिरूपाः भवन्ति स्म। तत्र सदस्येषु नार्याः महत्त्वं प्रधानमासीत्। पत्नीं विना कोऽपि पुरुषः धार्मिककृत्याधिकारी नैव भवितुं शक्नोति। तां विना स्वर्गप्राप्तिरपि नैव संभाव्यते–

**स रोक्ष्मज्जायाभामन्त्रयते, जाये एहि स्वो रोहावेति।**

**रोहावेत्याह जाया तस्माज्याया मन्त्रयते। अधौ ह**

**जाया वैष आत्मनो यज्याया।** (श.ब्रा.)

भार्यां विना नैव लोकयात्रेति अस्मदृषयः प्राक्तने काले एव उक्तवन्तः। वेदास्त्वादिशन्ति यत् नार्यः नराणां शक्तिः।। यदि पत्नी दिवङ्गता तर्हि सत्वरं द्वितीयामानयेत्–

**दाहयित्वाग्निहोत्रेण स्त्रियं वृतवर्ती पतिः।**

**आहरेद्विधिवद् दारानग्निश्चवालिम्बयन्।।** (याज्ञवल्क्यस्मृतिः 1.89)

पुरुषैः पूजार्हाः सन्ति वामाः, ता एव लक्ष्मीरूपाः, ता एव 'मेनाः' सन्ति यतस्ताः वन्द्याः (निरुक्ते 3.21) **भार्यस्तु** सखायः यतः मित्रसम्मतास्ताः, ताभिरेव सन्ततिर्दीयते–

**सखा ह जाया।** (ऐ. ब्रा. 3.3.1)

पत्नीपत्योर्मध्ये द्विदलोत्पत्तिकरमन्नमिव सम्बन्धः। यथा तादृशान्यत्रापि द्विदलत्वेन सम्पृक्तानि तद्वत् पत्नीपती–

स हैतावानस यथा स्त्री सुभांसौ संपरिष्यक्तौ। ततः पतिश्च पत्नी चाभवताम्।

तस्मादर्धवृगलमिव स्व इति हस्माऽऽह याज्ञवल्क्यः। (श. ब्रा. 14.4-2,4-5)

बृहदारण्यकोपनिषदि अपि तयोः सम्बन्धः व्याख्यातः। ऋग्वेदे कन्यायै आशीर्वचः दीयमानं वैदिकर्षिणा प्रोक्तम्–

**साम्राज्ञी श्वशुरे भव, साम्राज्ञी श्वश्रि भव।**

**ननन्दारि साम्राज्ञी भव, साम्राज्ञी अधिदेवेषु।।** (ऋ. 10.85.46)

**नारीकर्तव्यम्**–वैदिककाले कुमारीकन्यायै 'नारी' ति नामकरणं विवाहसमये क्रियते स्म। तस्मिन् वैवाहिकप्रसङ्गे 'लाजाहोम' इति कर्मणि सर्वप्रथमं कन्या आत्मानं 'नारी' पदेन सम्बोधयति स्म। अथर्ववेदे 14.2.63 अस्य चर्चा। विवाहानन्तरं नार्याः कर्तव्यद्वयं भवति स्म प्रथमं तु "आयुष्मानस्तु मे पतिः द्वितीयञ्च "एधन्तां ज्ञातयो मम"। विवाहात्पूर्वं मात्रानुदिष्टा कन्या सर्वं कर्तव्यं जानाति स्म यत् श्वशुरगृहे किं कर्तव्यं किञ्चाकर्तव्यमिति। नैतिकरक्षणेन गृहं स्वर्गरूपं तत्पतनेन च जीवनं नरकायते–

**वरुण्यं वा एतद् स्त्री करोति यदन्यस्य सती अन्येन चरति।**

(श. ब्रा. 2.5.2.20)

या स्त्री पुंश्चली तस्यै वरुण्यजन्यं पापं भवति-

**वरुणं वा एतत् गृह्णाति या पष्मना गृहीता भवति।**

(श. ब्रा. 12.07.217)



# अधिमासविमर्शः

डॉ. भारतभूषणमिश्रः

सर्वप्रथमं 'अधिमासशब्दश्रवणानन्तरमेव अयं विचारः मनसि समुदेति यत् कोऽयं अधिमासः, किं चास्य स्पष्टीकरणम्। धार्मिकदृष्ट्या अनेन प्रकारेण विहितम् अयं अधिमासः यः प्रायः सार्द्धद्विवर्षात् परं आगच्छति। अयं मलमासः मलिम्लुचः पुरुषोत्तममासशब्देनापि अभिधीयते। अस्माकं धर्माचार्याः शास्त्रज्ञाः अस्मिन् मासे केवलं देवानाराधयितुमेव आदिष्टवन्तः, यतोहि अयं मलः अर्थात् विकारयुक्तः मासः यः द्वादशमासेभ्यः पृथग् भवति। अत्र काम्यकर्मफलेच्छया, सांसारिकफलेच्छया वा शुभकर्म किमपि न कर्त्तव्यम्। अत्र केवलं शिवस्य विष्णोर्वा आराधनायाः महत्त्वं अधिकं भवति। यथा ग्रहणसमये, सूतके, जपदानादयः अक्षयपुण्यप्रदातारो भवन्ति तथैव अस्मिन् मलमासे कर्त्तव्यकर्मणां फलम् अविनष्टं भवति, नैतावदेव मदीयशास्त्रे द्वादशमासेषु द्वादशसूर्यस्य गणना भवति। यथा–

**मासेषु द्वादशादित्याः तपन्ति हि यथाक्रमम्,**
**नपुंसकेऽधिके मासि मण्डलं तपते रवेः।**
**धाता मित्रोऽर्य्यमा रुद्रो वरुणः सूर्य एव च,**
**भगो विवस्वान् पूषा च सविता दशमः स्मृतः।।**
**एकादशस्तथा त्वष्टा विष्णुर्द्वादश उच्यते।।**[1]

मासभेदे आदित्यभेदा दर्शिता यथा – **अरुणो माघमासे तु, सूर्यो वै फाल्गुने तथा। चैत्रे मासि च वेदज्ञो, वैशाखे तपनः स्मृतः। ज्येष्ठे मासि तपेदिन्द्रः, आषाढ़े तपते रविः। गभस्तिः श्रावणे मासि, यमोभाद्रपदे तथा। इषे हिरण्यरेताच्च, कार्तिके च दिवाकरः, मार्गशीर्षे तपेच्चित्रः, पौषे विष्णुः सनातनः। इत्येते द्वादशादित्याः काश्यपेयाः प्रकीर्तिताः।**[2]

अर्थात् द्वादशमासेषु क्रमेण द्वादश सूर्याः तपन्ति किन्तु अस्मिन् त्रयोदशे मासे केवलं सूर्यमण्डलमेव तपति। तात्पर्यमिदं भवति यत् अयं मासेषु अस्पृश्यो भवति किन्तु एतस्य कल्पनया सहैव भारतीयकालगणनायाः इतिहासस्य एकम् अतिप्राचीनपृष्ठं संयुक्तं भवति। ऋग्वेदकाले अस्मिन् कालगणना व्यवहारे आगतः आसीत्, एतस्य ज्ञातारः देवाः इव पूज्याः अमन्यन्त। एतस्योद्धरणं वरुणसूक्ते लभ्यते यथा–

**वेदमासो धृतव्रतो द्वादश प्रजावतः वेदाः य उपजायत।**[3]

अर्थात् संसारस्य सृष्टिस्थितिविनाशव्रतधारकः वरुणः जीवोत्पत्तिसंयुक्तः द्वादश मासान् जानाति तथा यः सम्वत्सरसमीपे अधिमासः उत्पद्यते तदपि जानाति। महाभारतसमयेऽपि एतद्गणनायाः एका प्रक्रिया स्थिरा कृता आसीत्, यदा पाण्डवानाम् अज्ञातवासः पूर्णतां गन्तुम् आसीत् तस्मिन् काले अयं प्रश्नः उदितोऽभूत् यत् अज्ञातवासः पूर्णतां गतो न वा? तदा एतस्योत्तरे आचार्यमहात्मा भीष्मः अवोचत् यत् मुहूर्त-क्षण-दिन-पक्ष-मास-ग्रह-ऋतु-सम्वत्सरादिविभागैः इदं कालचक्रं प्रचलति। एतस्य वृद्धिः तथा ह्रासः ग्रहाणां विपर्ययेण पञ्चमे-पञ्चमे वर्षे वारद्वयम् अधिमासः सम्पद्यते, एतदनुसारं पाण्डवानां वनवासस्य पञ्चमासद्वादशदिनानि चधिकानि संजातानि, यथा–

**तेषां कालातिरेकेण ज्योतिषां च व्यतिक्रमात्,**
**पञ्चमे-पञ्चमे वर्षे द्वौ मासौ उपजायतः।**
**एषामभ्यधिका मासाः पञ्च च द्वादश क्षपाः,**
**त्रयोदशानां वर्षाणामिति मे वर्तते मतिः।।**[4]

उपर्युक्तोद्धरणैः एतत् स्पष्टं जायते यत् प्रतिपञ्चवर्षेषु द्व्यधिमासयोः अर्थात् सार्द्धद्विवर्षे एकाधिकमासस्य गणनायाः पद्धतिः निर्धारिता आसीत्। अधुनाऽपि वेदाङ्गज्योतिषे अधिमासगणनायाः इयमेव पद्धतिः द्रष्टुं शक्यते। अत्र एतदपि विचारणीयं वर्तते यत् अधिमासस्वीकारस्यावश्यकता कुतः समागता, एतदस्माभिः वक्तुं शक्यते यत् वैदिककालस्य ऋषिमहर्षयः कालगणनां प्रति कियन्तः सचेष्टाः आसन्। तस्मिन् काले तिथिषु प्रतिदिनं चन्द्रनक्षेत्रषु पारस्परिकः सम्बन्धः कः? एतस्य ज्ञानम् एतावत्या सूक्ष्मतया ज्ञाता आसीत् यत् अद्यतनीनयुगे इदम् आश्चर्यं वरीवर्ति। तस्मिन् काले तिथीनामेव माध्यमेनैव मास-वर्षस्य गणना आसीत्, एतत्



कारणादेव तिथयः एव दिननाम्ना उद्ध्रियन्ते स्म। यथा–"तिथ्यात्मकं चान्द्रदिनम्" अर्थात् त्रिंशत्तिथीनां मासः तथा च षष्ट्युत्तरत्रिंशत्तिथीनाम् एकं वर्षं समाजव्यवहारे द्रष्टुं शक्यते। अस्माभिः दृश्यते यत् चन्द्रः प्रतिदिनं विविधनक्षत्रैः सह दृष्टिगोचरो भवति, किन्तु नक्षत्रं तु आकाशे स्थिरं तिष्ठति-उक्तमपि "न क्षरतीति नक्षत्रम्" अर्थात् चन्द्रमसः शीघ्रगामिकारणात् तदद्य यस्मिन् नक्षत्रे वर्तते, स्वः ततो दूरं चतुर्दशांशे स्थितेन नक्षत्रेण सह वर्तमानः चन्द्रः दृश्यते। चन्द्रमसः अपेक्षया सूर्यस्य गतिः अत्यन्तं मन्दं भवति यः एकस्मिन् दिने केवलं एकमंशमेव प्रचलति, परिणामतः प्रतिदिनं द्वादशांशस्य गतिवृद्ध्या चन्द्रः सूर्यादग्रे वर्धते यत् तिथिनाम्नापि व्यवह्रियते। यः अस्मद्दिवसकालात् किञ्चित् न्यूनीभूतं भवति अर्थात्-एकामावास्यायाः प्रारभ्य द्वितीयामावास्यां यावत् अथवा शुक्लप्रतिपदातः कृष्णपक्षस्य अमापर्यन्तं सार्द्धोनत्रिंशत् दिनानि भवन्ति सैव चान्द्रमास इति कथ्यते। अतः एवमपि कथयितुं शक्यते यत् एकतिथिमानं त्रयोविंशतिः घटिकाः, षट्त्रिंशत् क्षणानि अभवन्। यानि वर्षे चतुष्पञ्चाशदुत्तरत्रिंशद्-दिनस्य षड्घटिकायाश्च भवति। अतः एकादश-दिनस्य अन्तरेण चान्द्रवर्षं प्रतिवर्षं सावनवर्षात् पश्चाद्गामी भवति। अतः तृतीयवर्षे एकस्य चान्द्रमासस्य वृद्धिः अवश्यं संजायते। इयमेव चान्द्रमासवृद्धिः मलमास-शब्देन व्यवह्रियते।

भारतवर्षे वेदाङ्गज्योतिषस्य मध्यमगणनास्थाने ज्योतिषशास्त्रे ग्रहाणां स्पष्ट-गणनायाः सिद्धान्तः स्थिरः कृतो वर्तते। तदनुसारम् अधिमासेन सह चान्द्रमासो भविष्यति। यस्मिन् मेषादिद्वादशराशिषु केषु अपि सूर्यस्य संक्रान्तिः न भवेत्। भास्कराचार्योऽपि अमुमेव पन्थानम् अनुसृतवान्। एतद् अहं अनेनापि प्रकारेण वक्तुं शक्नोमि। "तत्राधिको मासोऽधिमासः" अर्थात् वर्षमध्ये नियमितद्वादशमासेभ्यो योऽधिको विशेषमासः स अधिमास इति कथ्यते। तत्रैकचान्द्रमासे यदा सूर्यस्य संक्रान्तिर्न भवति तदा स एवाधिमासः उक्तः प्राचीनैराचार्यैः "असंक्रान्तिमासोऽधिमासः प्रदिष्टः।।[5] एतस्यैतदेव तत्त्वं यद्रविसंक्रान्तिघटितचान्द्रमास एव मासगणनायां गृह्यते, न तु संक्रान्तिशून्यः" तथोक्तं सिद्धान्तग्रन्थे "मेषादिस्थे सवितरि यो यो मासः प्रपूर्यते चान्द्रः, चैत्राद्यः स ज्ञेयः पूर्तिद्वित्वेऽधिमासोऽन्त्यः।"[6] अस्यायमाशयः-मेषस्थे सूर्ये यस्य मासस्य पूर्तिः स चैत्रः। एवं प्रकारेण वृषस्थे सूर्ये यस्य मासस्य

पूर्तिः स वैशाखः, यस्य च मिथुनस्थे सूर्ये मासपूर्तिः स ज्येष्ठः इत्येवं सर्वे द्वादशमासाः विज्ञेयाः। तत्र यदि चान्द्रमासान्तःपातिसावनदिनसंख्याभ्यः सौरमासान्तःपाति सावनदिनसंख्याऽधिका तदा तु एवं स्यात्। यथा-




अत्र रेखायां अवलोकनेन ज्ञातं यत् मेषस्थे रवौ सति 'अ' बिन्दौ मासपूर्तिस्तेन 'अ' बिन्दौ चैत्रस्य पूर्तिर्जाता, एवञ्च वृषस्थे सूर्ये सति 'अ' चिह्नविशिष्ट-अमान्ते 'अ' तः 'अ'' पर्यन्तं वैशाखमासपूर्तिः, तयोर्मध्ये सामान्य-'अ' तः चिह्नविशिष्ट-'अ'' पर्यन्तं चान्द्रमासस्य मासगणनायां ग्रहणाभावात् नायं चैत्रो नायं वैशाखोऽपि, अत एव कथयितुं शक्यते यत् सामान्य-'अ' तः चिह्नविशिष्ट-'अ' पर्यन्तं चान्द्रमासोऽधिको जातः तेन अयमेव अधिमासः सिद्धः। तत्र युगपद्यदाऽमान्तसंक्रान्ती भवतः तदैककालादेव सौर-चान्द्रमासयोः प्रवृत्तिर्दृश्यते। तत्र चान्द्रमास-प्रमाणात्-सौरमासप्रमाणस्याधिकत्वात्, पूर्वं चान्द्रमासान्तः ततः परं सौरमासान्तः स्यात्। तत्र अमान्ततः संक्रान्तिपर्यन्तकाल एवाधिकः सिद्धः। अर्थात् चान्द्रमासान्तः पातिसावनदिन-संख्यातः एकसौरमासान्तः पातिसावनदिनसंख्यां तावत् एव अधिका जाता स एवाधिशेष उच्यते तथोक्तं भास्कराचार्येण सिद्धान्तशिरोमणौ 'दर्शाग्रतः संक्रमणकालतः प्राक् सदैव तिष्ठत्यधिमासशेषम्'[7] अयमेवाधिशेषः उत्तरोत्तरं मासे-मासे यदाऽधिकतरः सन्नेकमाससमः स्यात्तदा सौरमाससंख्यातः चान्द्रमाससंख्या तु एकाधिका जाता स एवाधिको मासोऽधिमास इति उच्यते। अत्र एकः अनुपातः क्रियते यथा – तत्र कल्पसौरमासः कल्पचान्द्रमासान्तरात्मकेन कल्पाधिमासेन कल्पचान्द्रमासा लभ्यन्ते, तदैकाधिमासेन किमित्यनुपातेनैकाधिमासो यावद्भिश्चान्द्रमासैर्भवति तन्मानमागतम्, उक्तं च भास्करेण-चन्द्रोनसौरेण हृतस्तु चान्द्रादवाप्तसौरैर्दशनैर्दलाढ्यैः। मासैर्भवेच्चान्द्रमसोऽधिमासः कल्पेऽपि कल्प्या अनुपाततोऽतः।[8] अयं अधिमासः मध्यमस्पष्ट-मानाभ्यामपि जायते, तत्र स्पष्टः चान्द्रसौरमासान्तररूपः स्पष्टोऽधिमासः।[9] मध्यमचान्द्रसौरमासान्तररूपो मध्यमाधिमासः। स अनुपातेन एव आयाति। त्रैराशिकस्य नियतैकगतित्वात्। अतएवाहर्गणानयने[10] कर्त्तव्ये यदि स्पष्टमानेनाधिमासपातो दृश्यतेऽर्थाच्चैत्रादितः इष्टमासपर्यन्त-मासेषु संक्रान्तिशून्यचान्द्रमासः प्रत्यक्षतोऽवलोक्यते



तदा द्वादशगुणितकल्पगतवर्षगणे चैत्रादिगतमासयोजनावसरे एको मासो न्यून एव गृह्यते, त्रैराशिकेन साधितत्वात्। अथेष्टसौरमासेभ्यः इष्टचान्द्रमासज्ञानार्थं, तदनन्तररूपाधिमासमानं यदानीतं तत्र यदि अधिशेषमानं मासासन्नं भवति तदाऽनुमीयते तद्गणितेन नाधिमासः पतितः, पतिष्यति पुरस्ताद्यदाऽधिशेषो माससमः स्यात्। परन्तु वर्तमानसमयेऽधिशेषस्य मासासन्नदर्शनेन गणितेन अधिमासो न लब्धस्तत्रालब्धेपि गृहीत्वा कर्म कृतमिति तावद् अयुक्तं तेन सैकेरधिमासैः कर्म कर्त्तव्यम्। यत्र स्पष्टमनेन चैत्रादि-इष्टमासावधौ मलमासपातो न दृश्यते, किन्तु सौरमासतः चान्द्रमासे कर्त्तव्येऽधिमासानयनं यत् त्रैराशिकेन क्रियते, तत्र अधिशेषमानं द्वित्र्यादिदिनात्मकगतं तदा ज्ञातं यद् गणितेनाधिमासैः कर्म कर्त्तव्यम्।

अधिमासः शुक्लादिमासोऽर्थात्तत्र पूर्वं शुक्लपक्षस्ततः कृष्णपक्षो भवति। तत्र प्रथमे पक्षे मृतस्याग्रिमवर्षे वार्षिकं पश्चाद् भवति, शुद्धमासस्य कृष्णादिकत्वात्। एवं मलमासीये द्वितीयपक्षे मृतस्याग्रिमे वर्षे वार्षिकं पूर्वमेव भवति। मलमासस्य मध्यबिन्दावर्थात्पूर्णान्ते यः क्षणस्ततः पूर्वं क्षणमात्रे मृतस्य अग्रिमवर्षे शुद्धमासे मासपूर्तिदिने वार्षिकं कर्त्तव्यम्। तथा च पूर्णिमान्तात् परस्तात् क्षणमात्रे मृतस्याग्रिमवर्षे वार्षिकं मासादौ प्रतिपदि भवति, तेन तयोर्वार्षिके एकमासान्तरिते जाते तत्रापि पूर्वमृतस्य पश्चात्, पश्चान्मृतस्य पूर्वमिति विज्ञेयम्। अस्मिन् मासे कस्यापि मृतस्य मासस्याग्रिमवर्षे मलमासत्वे तद्वार्षिकं मलमास एव कर्तव्यम्। उक्तं यथा-"अधिमासे तु कर्त्तव्यमाब्दिकं प्रथमं बुधैः" परन्तु द्वितीयादिवार्षिकं मलमासे न भवति। मृतमासाद् द्वादशमासाभ्यन्तरे मलमासपाते मासिकवृद्धिः कार्या, तत्रैकमासिकश्राद्धस्याधिकत्वात्। तत्र मृतमासाद् द्वितीये मासि प्रथममासिकं श्राद्धं भवति। तृतीये मासि द्वितीयं मासिकं एवं द्वादशे मासि एकादशमासिकं भवति अतएवोक्तं "मरणमासादेकादशमासिके कालाभ्यन्तरे मलमासपाते मासिकवृद्धिः करणीया"[11] मासिकवृद्ध्यभावे, वार्षिककालात् पूर्वमेकमासीयमासिकश्राद्धलोपप्रसङ्गः स्यात् अधिमासे पूर्वपक्षे शुक्लपक्षे मृतानामेव मासिकवृद्धिः यथा-श्रावणेऽधिमासपातो जातः तर्हि प्रथमश्रावणशुक्लपञ्चम्यां मृतस्य प्रथममासिकं तु द्वितीयश्रावणशुक्लपञ्चम्यां, द्वितीमासिकं तु भाद्रपदशुक्लपञ्चम्यामेव गणनयाऽग्रिमवर्षीयाषाढ़शुक्लपञ्चम्यां द्वादशमासिकं भवति, परन्तु तन्मध्ये ऊनषाण्मासिकोनवार्षिकयोरपि गणनोचितत्वाच्चतुर्दशमसिकानि जातान्यत

एवैकमासिकवृद्धिः उचिता। अधिमासीयकृष्णपक्षे मृतानान्तु न मासिकवृद्धिः भवति अर्थात् मलमासीयद्वितीयश्रावणकृष्णपक्षे मृतस्य जनस्य भाद्रपदकृष्णपक्षे प्रथममासिकम् अर्थात् मृतमासाद् द्वितीय मासि प्रथममासिकमेव गणनया मृतमासाद् द्वादशे मासि एकादशमासिकं भवत्यैव, तत्राप्यूनषाण्मासिकौन-वार्षिकयोर्योजनेन त्रयोदश मासिकानि जातानि तत्र न मासिकी वृद्धिः कार्या। मलमासे त्याज्यकर्माणि तदुक्तं यथा–

अग्न्याधेयं प्रतिष्ठां च यज्ञदानव्रतानि च।
देवव्रतवृषोत्सर्गचूडाकरणमेखलाः ।।
माङ्गल्यमभिषेकञ्च मलमासे विवर्जयेत्।
त्यजेद्दानं महादानं व्रतं देवविलोकनम्।।
वापीकूपतड़ागादिप्रतिष्ठा यज्ञकर्म च।

तथा च स्मृतिः–

सपिण्डीकरणादूर्ध्वं यत् किञ्चिच्छ्राद्धिकं भवेत्।
इष्टं वाप्यथवा पूर्त्तं तत्र कुर्यान्मलिम्लुचे।।

इत्थं समासेन अधिमासविषये प्रतिपादितेभ्यः सिद्धान्तेभ्यः अस्मदीयं ज्योतिषशास्त्रम् इदं स्पष्टं विवेचयितुमर्हति यत् प्रतिपञ्चमवर्षे द्वौ अधिमासौ भवतः। ज्योतिषशास्त्रस्य अयं निर्णयः सर्वैरपि जनैः अनुष्ठेयो भवति। यदेतस्मिन् मासे न किञ्चिदपि सत्कर्म कर्त्तव्यम् अवशिष्यते। यथा मया उपरि प्रतिपादितम् अयं मलमासः अपवित्रमासः इति अपवित्रत्वात् पवित्राणि कानि अपि कर्त्तव्यानि न भवन्ति। इतः अधिकं ज्योतिषशास्त्रीयं कलङ्क–पङ्क–प्रक्षालनावसरः नास्ति।

यः पश्चिमाभिमुखसंस्थितविद्यमानो
ह्यव्यक्तमूर्तिपरिवर्तितविश्वभोगः ।
दुर्लक्ष्यविक्रमगतिः कृतकर्मलक्ष्यो
राज्यश्रियं दिशतु वो रहमाण एषः।। मा.सा.।।



## सन्दर्भाः

1. विष्णुधर्मोत्तरपुराण
2. अमरकोषे – आदि अक्षरक्रमेऽस्ति।
3. ऋग्वेदः – (1-25-8)
4. विराट्पर्व अ.52
5. असंक्रान्तिमासोऽधिमासः स्फुटं स्याद्।
द्विसंक्रान्तिमासः क्षयाख्यः कदाचित्।
क्षयः कार्तिकादित्रये नान्यतः स्यात्
तदा वर्षमध्येऽधिमासद्वयञ्च।। सि. शिरोमणि पृ. - 84, श्लोक - 6
6. ब्रह्मसिद्धान्ते . . . . . गरुड़पुराणे च।
7. दर्शावधिश्चान्द्रमसो हि मासः सौरस्तु संक्रान्त्यवधिर्यतोऽतः।
दर्शाग्रतः संक्रमकालतः प्राक् सदैव तिष्ठत्यधिमासशेषम्।।
दर्शान्ततो याततिथिप्रमाणैः सौरैस्तु सौरा दिवसाः समेताः।
गतोऽधिशेषोत्यदिनाधिकाप्ते व्यक्तं तदस्मादधिमासशेषम्।।
तिथ्यन्तसूर्योदययोस्तु मध्ये सदैव तिष्ठत्यवमावशेषम्।
त्यक्तेन तेनोदयकालिकः स्यात् तिथ्यन्तकाले द्युगणोऽन्यथातः।।
(सिद्धान्तशिरोमणिः – सम्पादक डॉ. मुरलीधरचतुर्वेदः
पृ. 57, 379, श्लोक-16-17,18)
8. सिद्धान्तशिरोमणिः - पृ. 377 सम्पादकः - डॉ. मुरलीधरचतुर्वेदः।
9. सौरान्मासादैन्दवः स्याल्लघीयान् यस्मात्तेनोन्मीयमानास्तु सौराः।
यान्त्याधिक्यं तेषु ये चातिरिक्तास्तज्ज्ञैस्तस्मान्तेऽधिमासाः प्रदिष्टाः।।
(सि.शि. 15, श्लोक - 65)
10. अहर्गणस्यानयनेऽर्कमासाश्चैत्रादिचान्द्रैर्गणकान्विताः किम्।
कुतोऽधिमासावमशेषके च त्यक्ते यतः सावयवोऽनुपातः।।
(सि. शि. श्लोक - 15, पृष्ठ - 379)
11. कृत्यसारसमुच्चयः मलमासविचारः।

# किञ्चित् पारिभाषिकम्

काशिकावृत्तौ अष्टाध्यायीगतानां सूत्राणां शब्दाः यथा परिभाषिताः तथा सूत्र-तत्संख्योल्लेखपुरःसरम् अध्यायक्रमेणात्र संगृह्यन्ते।
अ. = अष्टाध्यायी। वा. = वर्तिकम्

आयामः — आयामो दैर्घ्यम्।
अ. यस्य चायामः 2.2.16

वंशः, वंश्यः — विद्यया जन्मना वा प्राणिनामेकलक्षणसन्तानो वंशः इत्यभिधीयते। तत्र भवः वंश्यः।
अ.संख्या वंश्येन 2.1.19

स्वयम् — स्वयम् एतदव्ययम् आत्मनेत्यस्यार्थे वर्तते।
अ.स्वयं क्तेन 2.1.25

क्षेपः — क्षेपो निन्दा।
अ. खट्वा क्षेपे 2.1.26

सामि — सामि इत्येदव्ययम् अर्द्धशब्दपर्यायः।
अ. सामि 2.1.27

अत्यन्तसंयोगः — अत्यन्तसंयोगः कृत्स्नसंयोगः, कालस्य स्वेन सम्बन्धिना व्याप्तिः।
अ. अत्यन्तसंयोगे च 2.1.29

अधिकार्थवचनम् — स्तुतिनिन्दाप्रयुक्तम् अध्यारोपितार्थवचनम् अधिकार्थवचनम्।
अ.कृत्यैरधिकार्थवचने 2.1.33

अन्नम् — संस्कार्यम् अन्नम्।
व्यञ्जनम् — संस्कारकं व्यञ्जनम्।
अ. अन्नेन व्यञ्जनम् 2.1.34

भक्ष्यम् — खरविशदमभ्यवहार्यं भक्ष्यम्।
मिश्रीकरणम् — भक्ष्यस्य संस्कारकम्।
(खरं कठिनम्, विशदं विभक्तावयवम्,
खरं च तद् विशदं च खरविशदम् =
हनुचलनेनादनीयमित्यर्थः–पदमञ्जरी)
अ. भक्ष्येण मिश्रीकरणम् 2.1.35



# भविष्यपुराणीयपर्यावरणम्

डॉ. मखलेशकुमारः

यद्यपि विश्वस्तरे परिचर्यमाणा पर्यावरणसंरक्षणचिन्तायाः चर्चा न बहु प्राक्तना तथापि विगतशताब्दीषु बाधरहितजनसंख्यावृद्ध्या, अरण्यानां विनाशपरिणत्या वनोद्भवानां प्राणिनामविरलगत्या प्रणाशेन औद्योगीकरणस्याविवेकपूर्णविस्तारेण प्रकृतेः सन्तुलनावरोधेन च जनानां कृते शुद्धजलस्य वायोः तथान्यवस्तूनामुपलब्धिस्तु अतीव कठिना जाता। ऋतम्भराप्रज्ञासम्पन्नैः अस्माकं ऋषिमुनिभिः अनेनैव कारणेन प्राचीनकाले एतादृशी जीवनपद्धतिः विकसिता। यया पद्धत्या सुखमयजीवनं यापयितुं समर्थो भवेत्, एतदर्थमेव पुराणवाङ्मये इष्टापूर्तकर्मणां महत्ता व्यापकता च प्रतिपादिता विद्यते। वैदिकवाङ्मयस्य भाषाकाठिन्यात् सर्वसाधारणजनदुरूहत्वात् पुराणान्येवास्माकं कृते अवलम्बभूतानि।

अस्मिन् क्रमे भविष्यपुराणे विस्तृता पर्यावरणसम्बद्धा महत्त्वपूर्णा चर्चा प्राप्यते। वर्तमानसन्दर्भे पर्वत-नदी-वन-पशु-पक्षि-वायुमण्डलादिका मिलित्वा पर्यावरणं रचयन्ति। अतः एतेषां समानरूपेण विकासेन वयं स्वकीयं पर्यावरणं संरक्षितुं समर्थाः भवामः। पर्यावरणदृष्ट्या पादपाः महत्त्वपूर्णं स्थानं भजन्ते। एते न केवलमस्माकं दैनिकीं व्यावसायिकीं औद्योगिकीम् आवश्यकतां पूरयन्ति अपितु भूकम्प-वात-वृष्ट्याद्यनेकासु दैवीषु आपदासु साहाय्यमपि कुर्वन्ति। वनोपवनवाटिकायाः समारोपणे द्रुमाः एव प्रयुक्ताः भवन्ति। भविष्यपुराणस्य मध्यमपर्वणि वृक्षाणां गुणधर्मस्य विषये मानवजीवनोपरि तेषां प्रभावस्य तथा च एतेषां रोपण-सम्वर्धन-संरक्षणविधेश्च सूक्ष्मविश्लेषणं कृतं वर्तते। पर्यावरणसंरक्षणदृष्ट्या भविष्यपुराणीयाः बहवः प्रसङ्गाः विचारणीयाः। पूर्वकर्मनिरूपणप्रसङ्गे वृक्षारोपणस्य कार्यमतीव महत्त्वपूर्णं निगदितम्। यतो हि यस्य कस्यापि वृक्षस्य यत्र कुत्रापि संरोपणं कल्याणकरं पर्यावरणसंरक्षकं

च न भवति। प्रकृत्या समुत्पन्नः पुराणनिर्दिष्टनियमानुसारं संस्कारितः संरोपितः वा तरुः कल्याणकारी भवितुमर्हति।

भविष्यपुराणस्य मध्यमपर्वणि पूर्तकर्मनिरूपण-प्रसङ्गे अन्तर्वेदीय–बहिर्वेदीय-भेदेन कर्मद्वयं प्रकीर्तितम्। ज्ञानसाध्यानि कर्माणि अन्तर्बेदीयानि भवन्ति। पूर्तकर्मणां गणना बहिर्वेदीयकर्मसु क्रियते। वापी-कूप-तडागादीनां निर्माणं वृक्षलतादीना संरोपणं बहिर्वेदीयकर्माणि अभिधीयन्ते, तत्रापि वृक्षस्यारोपणं महत्त्वपूर्णमिति। भविष्य-पुराणस्याभिमतं यत् पूर्तकर्मणः परिपालनं राज्ञः परमं श्रेष्ठं कर्त्तव्यमिति। यथा–

**अन्तर्वेदि प्रवक्ष्यामि ब्रह्मणोक्तं युगान्तरे।**
**बहिर्वेदं तथैवोक्तं शस्त्रं स्याद् द्वापरे कलौ।।**
**ज्ञानसाध्यं च यत्कर्म अन्तर्वेदीति कथ्यते।**
**देवता स्थापनं पूजा बहिर्वेदिरुदाहता।।**
**प्रपापूर्तादिकं चैव ब्राह्मणानां च तोषणम्।**
**गुरुभ्यः परिचर्या च बहिर्वेदी द्विधा मता।।**
**अकामेन कृतं कर्म कर्म च व्यसनादिकम्।**
**अन्तर्वेदी तदेवोक्तं बहिर्वेदी विपर्ययः।।**
**धर्मस्य कारणं राजा धर्ममेतद्भवेन्नृपः।**
**तस्मान्नृपं समाश्रित्य बहिर्वेदी ततो भवेत्।।[1]**

जलमिति प्रकृतिप्रदत्तोपहारः, अस्य अपरं नाम जीवनमिति। सामान्यरूपेण यत्र कुत्रापि जलप्रवाहेण जलावरोधने जलं दूषितं भवति। जलस्य अविवेकपूर्णोपयोगेन लाभस्थाने हानिरेव भवति। पर्यावरणसंरक्षणदृष्ट्या वृष्ट्या प्राप्तजलराशेः निर्मलीकरणार्थं पूर्तकर्मणि नूतन-वापी-कूप-तडागानां निर्माणं निर्दिष्टं वर्तते। "रोचनार्थाः फलश्रुतिः" इत्यनुसारं तादृशस्य निर्माणकार्यस्य कृते महत्पुण्यमुद्घोषितम्, येन जनाः अस्मिन् सत्कार्ये प्रवृत्ताः भवेयुः तथा च प्रकृतिप्रदत्तोपहारस्यास्य जलस्य सुरक्षा स्यात्। नूतनवापीकूपतडागानां निर्माणेन पुण्यलाभः भवत्येव ततोऽधिकं पुण्यं जीर्णवापीकूपतडागानामुद्धारेण समुद्घोषिम्। जीर्णकूपादीनामुद्धारकर्त्ता न केवलं स्वोद्धारं करोति अपितु स्वकीयं सम्पूर्णं कुलं तारयति इति भविष्यपुराणस्य दृढाभितम्। यथा–

**अथ वा देवमानेन कर्त्तव्यं भूतिमिच्छता।**
**यस्तडागं नवं कृत्वा जीर्णं वा नवतां नयेत्।।**



**सर्वं कुलं समुद्धृत्य स्वर्गलोके महीयते।**
**वापीकूपतडागाश्च उद्यानप्रवहास्तथा।।**
**पुनः पुनश्च संस्कार्यो लभते मौखिकं फलम्।**
**गुणानां च प्रमाणेन प्रतिमानं विभागतः।।[2]**

नद्यन्तिके श्मशानसमीपे वा जलाकराणां निर्माणं सर्वथा निषिद्धम्। यत्र जनानां बृहत् समुदायः स्यात् तस्मिन् बृहत्तरे ग्रामे शास्त्रदिशा तडागादीनां निर्माणं कर्त्तव्यम्। यथा–

**विप्रादीनां देवतानां समाजे मेरुस्थाने यत्र तत्रैव कुर्यात्।**
**नद्यास्तीरे वर्जयेद् वा श्मशाने तडागाद्वै आश्रमादीज्जनानाम्।।[3]**

अत्र इदमपि सुस्पष्टं यत् नूतननिर्माणकार्यात् अधिकं पुण्यं संरक्षणेन प्राप्यते। वापी-कूप-तडागादीनामुपरि वासस्थानस्य निर्माणं सर्वथा निषिद्धम्। जलप्रदूषणमपाकर्तुं भविष्यपुराणस्य एतादृशाः निर्देशाः वर्तमानपरिप्रेक्ष्ये महत्त्वपूर्णाः सन्ति। परोपकाराय देवकार्याय वा जलस्योपयोगः कुलोद्धारकत्वेन अङ्गीकृतः। अस्माकं परम्परायां पर्यावरणसरक्षणार्थं न केवलं भौतिकोपायानां निर्देशः अपितु आध्यात्मिकोपायाः निर्दिष्टाः। अस्मिन् सन्दर्भे पुराणेषु वर्णितं जलाशयप्रतिष्ठविधिः महत्त्वपूर्णः इति। अस्माकं संस्कृतौ प्राकृतिकसम्पदः भोगसाधनरूपेण न स्वीक्रियन्ते प्रत्युत एतासु सर्वत्र देवत्वं कल्पितम्। एवं देवत्वभावनां कृत्वा प्रसादरूपेणोपयोगः सर्वथा संरक्षणानुरूपमेव। प्राकृतिकसम्पदि देवत्वमेतदर्थमुपकल्पितं येन अन्धदोहनस्थाने विवेकपूर्णं नियन्त्रितं सेवनं स्यात्।

प्रकृत्याः अपरं वरदानं वृक्षरूपेण यत् प्राप्तं तस्मिन् विषयेऽपि भविष्यपुराणे विस्तृता चर्चा प्राप्यते। वनादनन्तरमुद्यानमेव एतादृशं निरापदं स्थानं भवति यत्रानेकानां वृक्षाणां सानिध्यमवाप्यते। उद्याननिर्माणसम्बद्धाः विषयाः पुराणवाङ्मये प्राचुर्येण चर्चिताः। अस्मिन् क्रमे भूमिपरीक्षण-पादपसंरोपण-संरक्षणादिनियमानां विस्तृतं विवेचनं प्राप्यते। भूमिपरीक्षणविषये उल्लिखितमस्ति यत् उद्यानस्य संरोपणात् पूर्वं दिनत्रयं यावत् कृष्णवृषेण भूम्याः कर्षणमपेक्ष्यते।[4] ततः परं तत्र सप्तधानस्य वपनं कार्यम्, यदा त्रीणि पञ्च सप्तेतिदिनान्तराले अङ्कुरितानि भवन्ति तदा यथाक्रमं सा भूमिः मध्यमा, अधमा वा भवति। भूमिपरीक्षणादनन्तरमेव कूपारामादीनां निर्माणं कर्त्तव्यम्।

समस्तेषु निर्माणकार्येषु विधिपूर्वकं वास्तुदेवतायाः पूजनमपि अपेक्षितम्। कीदृशस्य पादपस्य कुत्रारोपणं कर्त्तव्यमित्यपि पुराणवाङ्मये निर्दिष्टमस्ति। नदीतटे श्मशाने स्वनिवासस्य दक्षिणदिशि वा तुलस्याः रोपणं निषिद्धमिति। नदीतटे देवालये राजमार्गे वा छायायुक्तानां वृक्षाणां विधिपूर्वक संरोपणं पुण्यदायकं निगदितम्। यथा–

**नदीतीरे श्मशाने वा स्वगृहस्य च दक्षिणे।**
**तुलसीरोपणं कृत्वा याति कर्ता यमालयम्।**
**पत्रपुष्पफलानां च रजोरेणुसमागमाः।**
**पोषयन्ति च पितरं प्रत्यहं प्रतिकर्मणि।।**
**यंस्तु वृक्षं प्रकुरुते छायापुण्यफलोपगम्।**
**पथिं देवालये चापि पापात्तारयते पितॄन्।।**
**कीर्तिश्च मानुषे लोके प्रत्यभ्येति शुभं फलम्।**
**अतीतानागताश्चातः पितॄन्स स्वर्गतो द्विजाः।।**
**तारयेद् वृक्षरोपी च तस्माद्वृक्षं प्ररोपयेत्।**
**अपुत्रस्य हि पुत्रत्वं पादपा इह कुर्वते।।**[5]

यद्यपि पुत्रेण लोकान् जयति इति सनातनी श्रुतिः तथापि पुत्राभावेऽपि वृक्षाणां साहाय्येन लोकद्वयं साधयितुं शक्यते। पुत्राभावेऽपि वृक्षाः लौकिकं पारलौकिकं कार्यद्वयमपि साधयन्ति। अनेनैव कार्येण एकस्य अश्वस्थवृक्षस्य रोपणं लक्षपुत्रोत्पादनादपि श्रेष्ठं स्वीकृतम्। स्वस्य जीवने एकस्य एकाधिकस्य वा वृक्षस्य संरोपणमवश्यमेव करणीयम्। एतत् कथनं जनसाधारणस्य चेतसि आकर्षणोत्पादनदृष्ट्या महत्त्वपूर्णं वर्तते।[6] मनुष्याणामुपरि वृक्षकृतप्रभावस्य विस्तृता चर्चा अपि अस्मिन् पुराणे अवाप्यते। यथा अशोकः शोकनाशकः, विल्वः आयुवर्धकः, वकुलः रोगनाशकः, तिनिशः बलबुद्धिदायकः, शमी रोगनाशकः, पनसः मन्दबुद्धिकारकः भवति।[7] भविष्यपुराणानुसारं वृक्षारोपणस्य कृते वैशाख-आषाढ-भाद्रपदप्रभृतिमासाः प्रशस्ताः। अत्रैव वृक्षसंरक्षणदृष्ट्यापि महत्त्वपूर्णाः निर्देशाः प्रदत्ताः सन्ति।

यथा उद्याने कूपस्य निर्माणमवश्यमेव स्यात्। तुलसीवने न किमपि यज्ञकार्यं भवेत्। यथा–

**वैशाखे कीर्तिमाप्नोति ज्येष्ठे तु मरणं व्रजेत्।**
**आषाढ़े कीर्तिमाप्नोति श्रावणे परमां गतिम्।**



**भाद्रे धनागमश्चैव आश्विने कार्तिके क्षयः।।**[8]
**न कूपमुत्सृजेज्जातु वृक्षभागे कथञ्चन।**
**तुलसीवनभागे तु न चान्यं यागमाचरेत्।।**[9]

वृक्षाणां छेदनस्य यान्धा प्रवृत्तिः तामपाकर्तुं पारलौकिकं भयमपि चर्चितं विद्यते। अश्वत्थ-वट-विल्वादिवृक्षाणां छेदकः ब्रह्मघातीति पदेनाभिधीयते। कस्यापि वृक्षस्य छेदकः मूकः व्याधिशतपीडितः च भवति। अश्वत्थवृक्षं परितः दशहस्तपरिमितं भूक्षेत्रं पुरुषोत्तमक्षेत्रं स्वीक्रियते।

भविष्यपुराणे वृक्षाणां सम्यग्विकासार्थं यत्नाः समुपवर्णिताः सन्ति। यथा तिन्तणीकबीजानां इक्षुदण्डैः साकं परिपेषणं विधाय जलेन संमिश्रणं कृत्वा सिञ्चनेन अशोकवृक्षस्य विकासः जायते। नारिकेलफलाम्बु मधु च जलेन सम्मेल्य परिसिञ्चनेन आम्रवृक्षस्याभिवृद्धिः भवति। यथा –

**रोहिमत्स्यस्य पित्तानि धान्याकं तत्र स्थापयेत्।**
**तेनोदकादिसेकश्च कृतो वै वृद्धिमादिशेत्।।**
**तित्तिडीबीजमादाय इक्षुदण्डेन मर्दयेत्।**
**तेनाशोके प्रसेकः स्यात् सहकारस्य वृद्धिमान्।।**
**नारिकेलोदकं चैव माक्षिकैः सह सेचयेत्।।**[10]

अश्वत्थ-बिल्व-वट-तुलसी-पूग-वृक्षाणां भवनस्य समीपे प्रतिष्ठा अतिशोभना भवति। पनस-कदम्ब-पारिभद्र-सेमल-अशोकप्रभृति वृक्षाणां प्रतिष्ठा वासस्थानस्य समीपे न क्रियते। वृक्षाणां प्रत्यारोपणात् पूर्वं तेषां कर्णभेदसंस्कारस्यापि विधानं वर्णितं विद्यते। यस्मात् कारणात् इमे वृक्षाः पर्यावरणस्य संरक्षणे सहायकाः भवन्ति।

भविष्यपुराणे भूमिप्रदूषणं दूरीकर्तुं एकः सन्दर्भः प्राप्यते। प्राचीनभारते एतादृशी परम्परा आसीत् यत् समस्तेषु ग्रामेषु नगरेषु च गोचरभूमिः उत्सर्जिता भवति स्म। तत्र गावः स्वच्छन्दतया विचरन्ति स्म। सर्वसाधारणजनानां कृते तस्योपयोगः सर्वथा निषिद्धः। तत्र केवलं बालकानां क्रीडा एव विहिता। परन्तु वर्तमानसमये मनुष्याणामनियन्त्रितवृद्धिकारणात् लोभवशात् च गोचरभूमिः प्रायः विलुप्ता। येन न केवलं गोधनस्य महती क्षतिः संजाता अपितु अतिवृष्टि-अनावृष्टि-भूकम्पनादिदैवीनाम् आपदामपि प्रकोपः वर्धितः। भरणपोषणव्यवस्थाभावे

गोवंशो विलुप्तप्रायः वर्तते। रासायनिकोर्वरकाणां प्रयोगेण कृषिभूमिः मरुभूमिषु परिवर्तमाना दृश्यते। यन्त्राकर्षणेन कृषिक्षेत्रस्य उर्वराशक्तिरपि उत्तरोत्तरह्रासोन्मुखी भवति। गोचरभूमिसाहाय्येन अदुग्धदोहां गवां वृद्धवृषभाणां प्रजननाक्षमधेनूनां संरक्षणं भवितुमर्हति। अयं गोवंशः न तु भाररूपः यतो हि दुग्धाभावेऽपि एतेषां गोमयगोमूत्रेणापि उर्वरकस्य कीटनाशकौषधस्य निर्माणं भवितुं शक्यते येन रासायनिकोर्वरकाणां व्ययः न्यूनीकर्त्तुं पार्यते। भविष्यपुराणे गोचरभूम्युत्सर्गस्य महत्पुण्यं निगदितम्। अत्र न केवलं गोचरभूमेः व्यवस्था विहिता अपितु तस्याः स्वरूपस्य संरक्षायाः अपि सुन्दरं विवेचनं कृतम्। गोचरभूमेः क्षेत्रसीमां निश्चित्य तस्याः रक्षणार्थं पूर्वदिशि सघनवृक्षाणां रोपणम्, दक्षिणदिशि केदारस्य सेतोः वा निर्माणं पश्चिमदिशि सघनवृक्षाणां रोपणम्, दक्षिणदिशि कूपस्य निर्माणं विहितम्। अनेन अस्याः भूम्याः उल्लंघनमतिक्रमणञ्च जटिलं भवति येन तत् क्षेत्रं सुरक्षितं भवति। यथा–

**गोभ्य एषा मया भूमिः सम्प्रदत्ता शुभार्थिना।**
**एवं निवेदयेद्यस्तु गोप्रचारं समाहितः।।**
**सः मुक्तः स्वपापेभ्यो विष्णुलोके महीयते।**
**यावन्ति तृणगुल्मानि सन्ति भूमौ शुभानि च।**
**तावद्वर्षसहस्राणि स्वर्गलोके महीयते।**
**पूर्वे सीमां निवध्नीयात् कृत्वा वृक्षस्य रोपणम्।।**
**सेतुं कृत्वा दक्षिणतः पश्चिमेऽङ्गाररोपणम्।**
**उत्तरं खानयेत्कूपं तस्य सीमां न लङ्घयेत्।।**[11]

तस्यां गोचरभूमौ हरितशस्यस्य प्राचुर्येणोपलब्धिः स्यात् इत्यपि व्यवस्था कर्त्तव्या भवति। ग्रामस्य नगरस्य वा दक्षिणदिशि गोचरभूमिः स्यात्।[12] पुराणेषु गोचरभूमेः सीमा अपि निर्धारिता परिभाषिता अपि। यत्र शतानां गवाम् एकस्य वृषभस्य च स्वच्छन्दं विचरणं स्यात् सा एव गोचरभूमिः अपेक्षिता भवति। गोचरभूमेः सुरक्षामालक्ष्य पुराणेषु स्पष्टमुल्लिखितं यत् यः कश्चिद् जनः तस्यां भूमौ खननं वपनं कर्षणं निर्माणं वा करोति सः न केवलमात्मानमपितु स्वकीयान् पूर्वजान् अपि पातयति।[13] येन केन कारणेन यदि सा भूमिः विकृता, विनष्टा, दूषिता तृणप्रजनने अक्षमा वा स्यात् तदा तस्याः पुनः प्रतिष्ठा करणीया। येन अस्याः भूम्याः अक्षयत्वं



भवेत्। गोचरभूम्युत्सर्जनकर्त्ता भूम्युत्सर्जनकाले एव उत्सर्जितभूमौ निवासं क्रियमाणानाम् आकीट-पशु-मानवानां कल्याणाय ईश्वरं प्रार्थयति। यथा–

**मानुषाः पशवश्चैव ये निवसन्तीह मण्डपे।**
**स्वस्ति चास्तु सदा तेषां त्वत्प्रसादात्किल प्रभो।।**[14]

एतदतिरिच्य भविष्यमहापुराणे पर्यावरणसंरक्षणदृष्ट्या दिव्यभौमान्तरिक्ष-जन्यानामुत्पातानां विस्तृता चर्चा तथा च तच्छमनाय उपायाः निर्दिष्टाः। अस्माकं पर्यावरणप्रभावकर्त्री विशिष्टा सूर्यशक्तिरपि विशेषेण परिचर्चिता विद्यते भविष्यपुराणे। सूर्यप्रभावाणां तज्जनितप्राकृतिकपरिवर्तनानाम् अनुकूलप्रभावोत्पादकभौतिका-ध्यात्मिकोपायानां तेषु वनस्पति-फल-पुष्पादीनां प्रयोगस्य महती चर्चा अपि अवाप्यते।[15]

समासतः पुराणवाङ्मये पर्यावरणसंरक्षणोपायानां वर्णनसन्दर्भे भविष्यपुराणं महत्त्वपूर्णं स्थानं च भजते। पर्यावरणस्य शुद्ध्यर्थमनेकानां यज्ञानुष्ठानानामपि विधानं विहितम्। इष्टापूर्तकर्म अपि पर्यावरणसंरक्षणे स्वयोगदानं साधयति।

## सन्दर्भसूची


| | | | | |
|---|---|---|---|---|
| 1. भविष्यपुराणे मध्यमपर्वणि, पूर्वभागे, | | | | 9-1 तः 5 |
| 2. | ,, | ,, | ,, | 9-23 तः 25 |
| 3. | ,, | ,, | ,, | 9-36 |
| 4. | ,, | ,, | ,, | 10-3 |
| 5. | ,, | ,, | ,, | 10-33 तः 36 |
| 6. | ,, | ,, | ,, | 10-39 तः38 |
| 7. | ,, | ,, | ,, | 10-29 तः 49 |
| 8. | ,, | ,, | ,, | 10-57 तः 58 |
| 9. | ,, | ,, | ,, | 11-3 |
| 10. | ,, | ,, | ,, | 10-64 तः 65 |
| 11. | ,, | ,, | तृतीयभागे, | 2-13 तः16 |
| 12. | ,, | ,, | ,, | 2-18 |
| 13. | ,, | ,, | ,, | 2-19 |
| 14. | ,, | ,, | ,, | 2-42 |
| 15. | ,, | ,, | ,, | 20 सम्पूर्णम् |




# वैदिकनारीणामानुष्ठानिकी उपस्थितिः


**डॉ. उमेशप्रसादसिंहः**


वैदिकवाङ्मये नारीणां महत्त्वं तथा च तासां प्रतिष्ठामुपस्थापयितुं मन्त्रद्रष्टारः ते ऋषयः यतमानाः दृश्यन्ते। प्रायशः वेदेषु नारीणामुपस्थितिः त्रिधा लक्ष्यते-स्तुतिषु प्रार्थनासु पुनश्च आनुष्ठनिकसत्रेषु। इह हि तासां निरूपणमुपमारूपकमाध्यमेन तु कदाचित् देवीनां संस्तवनव्याजेन कृतं विद्यते।

ऋग्वेदे अदिति-उषा-इन्द्राणी-इला-भारती-होत्रा-श्रद्धेत्यादयः देव्यः स्त्रीस्वरूपस्य प्रतिनिधित्वमावहन्ति। एताः क्वचित् देवमातरः तु क्वापि देवकन्याः मन्यन्ते। ऋग्वेदस्य वाक्सूक्तं नारीणां समग्ररूपं निरूपयति। वाग्देव्याः स्तुतिव्यपदेशेन ऋषयः रुद्रवसुविश्वेदेवादित्याः तस्या अनुयायिनः सन्तीति प्रमाणीकुर्वन्ति। मित्रवरुणेन्द्राग्निसोमादिदेवानां खल्वि[illegible]ाश्रयभूता। प्रथमं स्थानमलङ्करोतीयं पूजनकर्मसु। मानवानां सर्वविधकारणभूता सैव महाशक्तिः या सततं प्रेरणां प्रददाति। ऋषीणामन्तः-करणे अवतीर्य सैव मन्त्रोद्भावनशक्तिरूपेण परिणता भवति। वाग्देव्याः सामर्थ्यमेव यत् वेदनिन्दकान् संहर्तुं रुद्रैः प्रयुज्यमाने धनुषि सुतरां प्रविशति।[1] द्यावापृथिव्योः वर्णनमपि देवीरूपेणैव अनेकत्र प्राप्यते। प्रथममण्डलस्य 159 तथा च 160 तमेषु सूक्तेषु द्यावापृथिवी यज्ञवर्धिका, महती, यजमानमाता,उदारा, सदया, अमृतदात्रीत्यादिरूपेषु चित्रिता वरीवर्त्ति।

यजुर्वेदसंहितायां विविधानामनुष्ठनानां चर्चा वर्तते। विनियोगपरिकायामस्यां संहितायां नारीणामानुष्ठनिकोपस्थितिः फलदायिनी भवतीति स्पष्टमुल्लिखितं विद्यते। तासां यज्ञकर्मसु तथा च समाजे आदृतं स्थानमासीदिति ऋषिभिः प्रमाणीकृतम्। दर्शपूर्णमासप्रसङ्गे दर्भमुष्टिं सम्बोधयन्ती यजमानस्य पत्नी वदति 'त्वमेव ज्ञानस्वरूपा, त्वमेव देवान् बोधयित्री अत एव मह्यमपि ज्ञानस्वरूपा भूयाः।[2] निहितार्थोऽयमत्र यदा नारी जिज्ञासां करोति तदा सा भविष्यनिर्माणं कुर्वती भवति। ऋग्वेदस्य वाक्सूक्ते अपि स्पष्टं यत् यः ज्ञानस्य उपेक्षां करोति सः इहलोके हीनः एव। गार्हस्थजीवने तु

स्त्रीणामुपस्थितिः अपरिहार्या एव, यतः स्त्रीहीनः पुरुषः कदापि लक्ष्यसिद्धिं न कर्तुं पारयति। गार्हपत्याग्निं निवेदयन् यजमानः 'शतं समाः गार्हपत्यं सम्पादयामः पतिपत्नी उभौ अखण्डजीवनं प्राप्नुवः' इति।[3] एतेन स्पष्टं भवति यत् कान्तावियोगः जीवनस्य समग्रतायां बाधकः अस्ति।

चातुर्मास्यादिमन्त्रेषु कुमारीणां वाणीद्वारा-इत्थं स्पष्टीक्रियते यत् विवाहस्य पश्चात् सा पितृगृहात् मुक्ता परन्तु पतिगृहात् कदापि वियुक्ता न स्यात्। आधुनिकपरिदृश्ये एतस्य महती प्रासङ्गिकता। उक्तकन्यावचनात् तत्त्यागस्य विवेकस्य वा परिचयः प्राप्यते। अच्युतिपरकद्वन्द्वभावस्य एतन्निदर्शनं दिव्यदृष्टेः परिणामः एव। अग्निष्टोम-प्रसङ्गे मातुः उच्चतमा स्थितिः प्रस्फुटिताऽस्ति। स्नातुं जलाशये प्रविश्य यजमानः जलधाराः मातृवत् मन्यमानः पवित्रतायै याचनां विदधाति।[4] शतरुद्रीयाध्याये रुद्रं प्रार्थयन् अपि 'मा नो वधीः मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः।'[5] तात्पर्यमिदं यत् मातृस्थानं भूमेः गुरुतरात् तथा च सैव पुत्रे निश्छलं स्निह्यति। अग्निष्टोमविधौ पत्नी धनस्य अधिष्ठात्री अस्ति अतः पतिः कथयति ...रमस्वास्मे ते बन्धुस्त्वे रायो मे रायो मा वय रायस्पोषेण वियौष्म तोतो रायः।[6] पुनश्च, आदित्यग्रहादिमन्त्रेषु पूतभृद्घटं पश्यन्ती यजमानपत्नी ऋत्विग्भ्यः वीर्यवन्तं पुत्रमेवञ्च वरणीयधनमभिकाङ्क्षति।

अश्वमेधानुष्ठानस्य फलश्रुतौ यजमानेन मनोहारिण्याः सर्वगुणसम्पन्नाया भार्यायाः कामना प्रतिफलिता विद्यते।[7] पत्युत्सुकानां कन्यानां मण्डनप्रियता अपि बहुशः स्फुटा भवति।[8] उषोदेव्याः सौन्दर्यं कस्य मनांसि न हरति? स्मयमानाऽलङ्कृता दिव्यस्वरूपा यजनीया सा यज्ञवेदिकायामासनं प्रतिगृह्यतामिति प्रार्थना तस्याः लावण्यमेव प्रकटयति। नारीणां शृङ्गारभावाभिव्यक्तिस्थलमपि महत्त्वपूर्णमेव। ऋषिणा बिम्बप्रतिबिम्बभावैः स्पष्टीकृतं यत् श्रोत्रं निकषा आगम्यमाना प्रत्यञ्चा मुग्धनायिकावत् अव्यक्तध्वनिं करोति।[9]

निष्कर्षतः सामाजिकसन्दर्भेषु नारीणां नितरामुपस्थितिः वैदिकनारीणां स्वरूपमुद्घाटयति। अत्र क्वापि नारी विवशतया जीवनं नैव नयति। ऋषीणामाकलने कुत्रचिदपि सा अबलारूपेण चित्रिता नास्ति। यज्ञकर्मसम्पादनं स्वस्थगार्हस्थजीवनं ऋते नार्याः असम्भवमेव। समानाधिकारप्राप्तास्ताः कदाचिदपि हीनभावनया ग्रस्ताः न सन्तीतिशम्।



## सन्दर्भसूची-

1. ऋ.वे.सं.–10.125.1

10. 125.6 'अहं रुद्राय धनुरा तनोमि ब्रह्मद्विषे शरवे.......।'

"

2. शु.यजु. सं. 2.21

3. " " " 2.27 'अग्ने गृहपते सुगृहपतिस्त्वयाग्नेऽहं....।'

4. " " " 4.2

5. " " " 16.15

6. " " " 4.22

7. " " " 22.22

8. " " " 17.97,

'कन्या इव बहतुमेतवा उ अञ्जयञ्जाना अभिचाकशिमि।

यत्र सोमः सूयते यत्र यज्ञो घृतस्य धारा अभितप्तवन्ते।।'

9. " " " 29.40,41

# किञ्चित् पारिभाषिकम्

**काशिकावृत्तौ अष्टाध्यायीगतानां सूत्राणां शब्दाः यथा परिभाषिताः तथा सूत्र-तत्संख्योल्लेखपुरःसरम् अध्यायक्रमेणात्र संगृह्यन्ते।**

**अ. = अष्टाध्यायी। वा. = वर्तिकम्**

| | |
|---|---|
| समानाधिकरणम् | भिन्नप्रवृत्तिनिमित्तस्य शब्दस्य एकस्मिन्नर्थे वृत्तिः समानाधिकरणम्। |
| | अ. पूर्वकालैक. . . .समानाधिकरणेन 2.1.49 |
| पापम् | |
| आणकम् | पापाणकशब्दौ कुत्सनाभिधायिनौ। अ.पापाणके कुत्सितैः 2.1.54 |
| उपमानम् | उपमीयतेऽनेन इत्युपमानम्। |
| सामान्यम् | उपमानोपमेययोः साधारणो धर्मः सामान्यम्। |
| | अ. उपमानानि सामान्यवचनैः 2.1.55 |
| उपमितम् | उपमेयम् उपमितम्। |
| | अ. उपमितं व्याघ्रादिभिः सामान्याप्रयोगे 2.1.56 |
| विशेषणम् | भेदकं विशेषणम्। |
| विशेष्यम् | भेद्यं विशेष्यम्। |
| | अ. विशेषणं विशेष्येण बहुलम् 2.1.57 |
| पोटा | उभयव्यञ्जना पोटा इत्यभिधीयते। |
| गृष्टिः | गृष्टिः एकवारप्रसूता। |
| धेनुः | धेनुः प्रत्यग्रप्रसूता। |
| वशा | वशा वन्ध्या। |
| वेहद् | वेहद् गर्भपातिनी। |
| बष्कयणी | बष्कयणी तरुणवत्सा। |
| | अ. पोटायुवति . . . . .धूर्तैर्जातिः 2.1.65 |
| एकदेशी | एकदेशोऽस्यास्तीति एकदेशी अवयवी। |
| | पूर्वपराधरोत्तरम् . . . . . 2.2.1 |
| परिमाणी | परिमाणम् अस्याऽस्तीति परिमाणी। |
| | अ. कालाः परिमाणिना 2.2.5 |



# वैदिकध्वनिविज्ञाने स्फोटनविचारः

**सुशीलकुमारपाठकः**

स्वरेणाव्यवहितयोः व्यञ्जनयोः स्वरव्यवधानरहितानां वा व्यञ्जनानां संयोगसंज्ञा विहिता। यथोक्तं पाणिनिना–"हलोऽनन्तराः संयोगः।"[1] कात्यायनेनापि वाजसनेयिप्रातिशाख्ये विहितम्–"अनन्तरं संयोगः।"[2] संयोगे संयुक्तव्यञ्जनयोः उच्चारणे असौविध्यं भवति। विषयेऽस्मिन् प्राचीनैः वैदिकाचार्यैः सूक्ष्मदृष्ट्या ध्वनिवैज्ञानिकं चिन्तनं कृत्वा मन्त्राणामभीष्टोच्चारणार्थं स्वस्वशास्त्रेषु तन्निमित्तं विधानमपि कृतम्। तेषु संयोगविषयकोच्चारणवैशिष्ट्येषु अभिनिधानम्, यमः, स्वरभक्तिः, द्वित्वं स्फोटनं, कर्षणञ्चेति तेषां सूक्ष्मदृष्ट्या वैज्ञानिकचिन्तनस्य परिणामः योऽद्यापि ध्वनिविज्ञानस्य क्षेत्रेऽतिमहत्त्वपूर्णो विद्यते। अत्र स्फोटनविषयमधिकृत्य तद्ध्वनिवैज्ञानिकं विश्लेषणं क्रियते।

स्फोटनं नाम पृथक्करणम्। द्वयोः स्पर्शयोः विशेषरूपस्य संयोगे जाते पूर्वेण स्पर्शेन परस्य स्पर्शस्य पृथगुच्चारणं स्फोटनमित्यभिधीयते। वाजसनेयिप्रातिशाख्यस्य भाष्यकारोवटानुसारं पिण्डीभूतस्य संयोगस्य पृथगुच्चारणं स्फोटनम्–"स्फोटनं नाम पिण्डीभूतस्य संयोगस्य पृथगुच्चारणम्।"[3] भाष्यकारानन्तेनापि एवमेव समर्थितम्।[4] चतुरध्यायिकायाः भाष्यकारजमुनापाठकानुसारं स्थानात् करणस्य पृथक्करणं स्फोटनम्-"स्फोटनं नाम स्थानात्करणविमोक्षः।"[5]

चतुरध्यायिकायां स्फोटनस्य विधानं वर्गविपर्यये संयोगे कृतमस्ति। यदा द्वयोः स्पर्शवर्णयोः संयोगे प्रथमः स्पर्शः परवर्तिनः वर्गस्य द्वितीयः स्पर्शश्च पूर्ववर्तिनः वर्गस्य स्यात् तदा पूर्वेण स्पर्शेन स्पर्शस्य स्फोटनं कर्त्तव्यम् चेत् प्रथमस्पर्शः विरामस्थः पदान्त्यः भवेत्–"वर्गविपर्यये स्फोटनः पूर्वेण चेद् विरामः।"[6] यथा–"वषट्कारेण।"[7] अत्र टकारककारयोः स्पर्शद्वयोः संयोगे प्रथमः स्पर्शः टकारः द्वितीयस्पर्शककारापेक्षया परवर्गीयः। अत एव संयोगोऽयं वर्गविपर्ययेन विद्यते। विधानानुसारमत्र स्फोटनं कर्त्तव्यम्। ध्यातव्यमपि यत् संयोगस्य प्रथमः स्पर्शः पदान्तेऽपि वर्तते यतो हि

समस्तपदस्य पूर्वपदं स्वतन्त्रपदवत् भवति। यथोक्तं तैत्तिरीयप्रातिशाख्ये- "नानापदवदिङ्ग्यमसङ्ख्याने।"[8] एवमेव-वान्यान्यपि निदर्शनान्यवगन्तव्यानि- "भवत्कम्।"[9] "एजत्कः।"[10] "त्रिष्टुब्गायत्री।"[11] "यद्गायत्रे।"[12] "अनुष्टुप्कथम्।"[13] "उत्खिदन्।"[14] "यद्घोषैः।"[15] एषु सर्वेषु निदर्शनेषु वर्गविपर्ययेन संयोगः। वाजसनेयिप्रातिशाख्ये कात्यायनेन कवर्गे परे स्पर्शत् स्फोटनं विकल्पेन दोषो मतः- "स्फोटनं वा ककारवर्गे स्पर्शात्।"[16] एवं स्पष्टमिदं यत् पक्षे दोषः न भवति। यथा- "काण्डात्काण्डात्।"[17] "वषट्कृतम्।"[18] अत्रापि वर्गविपर्ययेनैव संयोगः। परञ्चात्र कवर्गे पर एव विधानम्। अन्ये वर्गे परे मौनमाश्रितम्। तात्पर्यमिदं यत् वर्गविपर्यये संयोग एव कवर्गे परे स्पर्शात् स्फोटनं विकल्पेन दोषः, नान्यत्र। पक्षे हि प्रातिशाख्ये स्वचरणमधिकृत्यैव विधानं विहितम्। युक्तायुक्तप्रपञ्चेनालम्। अत्र तु विहितस्य स्फोटनस्य ध्वनिवैज्ञानिकं विश्लेषणं विचारणीयम्। वस्तुतस्तु वर्णमालायां कवर्गः चवर्गः टवर्गः तवर्गः पवर्गश्च इति वर्गाणां क्रमोऽयं मुखस्थोच्चारणस्थानानुसारं निर्धारितं विद्यते। मुखेऽभ्यन्तरात् क्रमशः जिह्वामूलः कण्ठः वा, ततः तालु, मूर्धा, दन्ताः ओष्ठश्च क्रमेण स्थितः। तत्र प्रथमः जिह्वामूलः तत्रोच्चारितः कवर्गः वर्णमालायां प्रथमः। तत्पश्चात् तालुः द्वितीयः। वर्णमालायां तत्रोच्चारितः चवर्गः द्वितीयस्थानीयः। तृतीये स्थाने मूर्धनि उच्चारितः टवर्गः तृतीयस्थाने विद्यते। एवमेव चतुर्थे दन्तस्थाने उच्चारितः तवर्गः चतुर्थस्थाने तथा च क्रमेण पञ्चमे स्थाने ओष्ठे उच्चारितः पवर्गः पञ्चमस्थानीय अनेनैव क्रमेण वर्णमालायां स्पर्शवर्णानां पाठः विद्यते।

स्पर्शवर्णानामुच्चारणे क्रियात्रयं भवति। प्रथमं तावत् विवाराख्यबाह्यप्रयत्नेन कण्ठविवरस्य विवृतदशायां प्राप्तस्य श्वासाख्यस्य वायुद्रव्यस्य अथवा संवाराख्य-बाह्यप्रयत्नेन कण्ठविवरस्य संवृतदशायां प्राप्तस्य वायुद्रव्यस्य मुखे आगमनम् अपरं तावत् स्पृष्टाख्याभ्यन्तरप्रयत्नद्वारा स्थाने करणस्य स्पर्शनं मुखे वायुद्रव्यस्यावरोधनम् तत्पश्चात् स्थानात्करणस्य विमोक्षः। तृतीयक्रियायामेव स्थानात् करणविमोक्षात् मुखेऽपि पुनः विकृतं वायुद्रव्यं मुखाद् बहिः निःसरति सहैव स्पर्शवर्णः श्रुतिगोचरः भवति।

वर्णक्रमस्य संयोगे तु पूर्वेण स्फोटनं स्वभावतः भवत्येव। यतो हि पूर्वस्य स्फोटनं विना संयोगस्य द्वितीयस्पर्शस्योच्चारणस्थाने वायोः गमनं सम्भवमेव नास्ति यत्र करणस्य स्पर्शेन तस्यावरोधः जायते। यथा-"मरुद्भिः।"[19] अत्र दकारोच्चारणार्थं



दन्ते जिह्वाग्रेण स्पर्शः भवति। स्फोटनात्पूर्वं भकारोच्चारणार्थम् ओष्ठस्थाने वाय्वभावः एव भवति। दकारस्य स्फोटनानन्तरमेव तत्र वायोः गमनं सम्भवम्। अत एव भकारोच्चारणस्य स्पर्शार्थं तु पूर्वं दन्तात् जिह्वाग्रस्य स्फोटनं स्वाभाविकमेव। परञ्च वर्गविपर्यये संयोगे तत्र भवति। यतो हि परवर्गस्य पूर्वस्पर्शस्योच्चारणार्थं स्थानकरणयोः स्पर्शकाले एव पूर्ववर्गस्य परस्पर्शस्य स्थानेऽपि वायुद्रव्यं विद्यमानमेव भवति। अत एव परवर्गस्य पूर्वस्पर्शस्य स्फोटनं विनापि पूर्ववर्गस्य परस्पर्शस्योच्चारणार्थं स्थाने करणेन स्पर्शनं सम्भवम् येन परवर्गस्य पूर्वस्पर्शस्य पूर्णोच्चारणं भवितुं न शक्नोति। अत एव वर्गविपर्यये संयोगे परवर्गस्य पूर्वस्पर्शस्य पूर्णोच्चारणार्थं स्फोटनं कर्त्तव्यम्। यथा-वषट्कारेण इत्यत्र वर्गविपर्ययेन टकारनकारयोः संयोगः। यदा टकारोच्चारणार्थं मूर्धनि प्रतिवेष्टितजिह्वाग्रेण स्पर्शः भवति तदा ककारस्यापि स्थाने जिह्वामूले वायुद्रव्यं विद्यते एव। अत एव मूर्धस्थानात् प्रतिवेष्टितजिह्वाग्रस्य स्फोटनं विना एव ककारोच्चारणार्थं जिह्वामूले हनुमूलेन स्पर्शनं सम्भवं जातं येन टकारस्य पूर्णोच्चारणं भवितुं न शक्यते। अतएव टकारस्य पूर्णोच्चारणार्थं मूर्धस्थानात् प्रतिवेष्टित-जिह्वाग्रस्य स्फोटनं कर्त्तव्यम्। तदनन्तरं ककारोच्चारणार्थं प्रयत्नो विधेयः।

चतुरध्यायिकानुसारेण स्फोटनस्य कालः अणुमात्रिको भवति। परञ्चैकेषामाचार्याणां मते अर्धाणुमात्रा अस्य कालः विद्यते।[20] तच्च पूर्वस्वरस्याङ्गं भवति। स्फोटनेन संयोगस्य पृथक्करणं न भवति प्रत्युत संयोगः भवत्येव।[21]

स्फोटनस्येव प्रसङ्गे कर्षणस्यापि विषयमधिकृत्य किञ्चिद्विचारणीयं तथ्यं ज्ञातव्यम्। यतो हि स्फोटनस्यापवादोऽयम्। शब्दोऽयं चतुरध्यायिकायामुच्चारणकालस्य विप्रकषार्थं प्रयुक्तः। चतुरध्यायिकानुसारं चवर्गे परे टवर्गस्य स्फोटने कालस्याधिक्यं भवति। तदेव कर्षणः नाम। वस्तुतस्तु टचवर्गयोरपि संयोगः वर्गविपर्ययेनैव विद्यते। अत एव तत्रापि स्फोटनं कार्यम्। परञ्चात्र स्फोटनोपेक्षया किञ्चित्कालाधिक्यं भवति। यतोहि टकारोच्चारणे प्रतिवेष्टितजिह्वाग्रेण मूर्धनि स्पर्शकार्यं भवति परञ्च स्फोटनानन्तरं प्रतिवेष्टितजिह्वाग्रस्य स्वाभाविकावस्थामवाप्तुमन्यवर्णापेक्षया किञ्चित्कालाधिक्यं भवत्येव। तदैव कालाधिक्येन सह स्फोटनः कर्षणसंज्ञयाभिधीयते।

एवं स्पष्टमिदं यद् वैदिकध्वनिविज्ञाने स्फोटनविषयकविधानं ध्वनिविज्ञानमाधृत्य वैदिकाचार्याणां सूक्ष्मदृष्ट्या चिन्तनस्य परिचायकं विद्यते।

## सन्दर्भसूची–


1. अष्टाध्यायी 1.6.6
2. वाजसनेयिप्रातिशाख्यम् 1.48
3. वाजसनेयिप्रातिशाख्यम् 4.165 उवटभाष्यम्
4. तत्रैव, अनन्तभाष्यम्
5. चतुरध्यायिका 2.1.38 निर्मलभाष्यम्
6. चतुरध्यायिका 2.1.38
7. अ. सं. 5.26.12
8. तैत्तिरीयप्रातिशाख्यम् 1.48
9. अ. सं. 2.3.1
10. अ.सं. 5.23.7
11. तत्रैव 18.2.6
12. तत्रैव 9.10.1
13. तत्रैव 8.9.20
14. तत्रैव 4.11.10
15. तत्रैव 5.24.8
16. वाजसनेयिप्रातिशाख्यम् 4.165
17. वा. सं. 13.20
18. वा. सं. 7.26
19. अ. सं. 2.29.4
20. तदेव स्फोटनः (अ.च. 1.4.12)
21. पूर्वस्वरं संयोगाविघातश्च (अ.च. 1.4.13)




# मनुस्मृतौ मानवीयो मूल्यबोधः

**डॉ. शुकदेव भोइ**

मूल-शब्दात् 'यत्' प्रत्यये कृते 'मूल्य' शब्दः सिद्ध्यति।[1] कस्यचित् पदार्थस्य परिवर्त्ते देयं धनं पदार्थः वा मूल्यशब्दवाच्यो भवति। वस्तुतः एष शब्दः व्यापकः अस्ति। यतो हि पदार्थस्य उपयोगिता एतस्य आधाररूपेण विद्यते। अर्थतः, पदार्थस्य उपयोगितां महत्त्वं वा यो विशिष्टो धर्मः प्रतिपादयति सः 'मूल्य' पदेन बोध्यते।

मूल्यं व्यक्तेः जीवनस्य निर्देशकः सिद्धान्तः अस्ति। मूल्यमाश्रित्य कश्चित् आत्मनः जीवनस्य दशां दिशं च निश्चिनोति। कर्तव्याकर्त्तव्यबोधः मूल्येनैव आगच्छति। मूल्यमेव जीवनस्य आधारभूताम् आवश्यकतां विविधव्यापारान् व्यवहारान् आचारांश्च नियमयति। मूल्यं व्याख्याय डॉ. रङ्गनाथपाठकः विमृशति यत् सभ्यतायाः संस्कृतेश्च सर्वोत्तमानि वैशिष्ट्यानि मनुष्यः मूल्यानाम् अनुपालनेन एव प्राप्तवान् अस्ति। एतत्तु निर्विवादम् अस्ति यत् मूल्यस्य मूले मनुष्य एव अस्ति, यतो हि मनुष्येण निर्मितस्य आदर्शाधारितजीवनस्य मानदण्डरूपेण मूल्यमेव विद्यते। मूल्येनैव मनुष्यः स्वस्य आचारविचारान् व्यवस्थापयितुं नियमयितुं च शक्नोति।[2] धर्मार्थकाममोक्षाणां चिन्तनैः सह आचारविचारयोः, कलासाहित्ययोः कर्तव्याकर्त्तव्पययोश्च मूल्याङ्कनेन सह व्यवहारो हि मानवीयमूल्यस्य आधारस्तम्भो विद्यते। अतः मानवीयमूल्यं विविधज्ञानानां कोश इति उच्यते। अत्र मनुष्यस्य तानि कर्माणि अन्तर्निहितानि भवन्ति यैः स्वस्य समाजगतस्य अपरस्य वा कस्यचित् अपि हानिः न भवति। सर्वेषु आत्मवत् दृष्टिः सर्वान् प्रति श्रद्धा दया क्षमा चेत्यादयः सद्भावनाः भारतीयजीवनमूल्यानि वा धर्मकर्मान्यतरमुखेन वैदिककालाद् आरभ्य सुरक्षितानि सन्ति। एतस्यां धार्मिक्यां कर्मगतायां वा अवधारणायां पुरुषार्थचतुष्टयमुखेन लौकिकैः पारलौकिकैश्च मूल्यैः युक्तं भारतीयं जीवनं कल्पितम् अस्ति। धर्मशास्त्रेषु सत्कर्म मनुष्याणां सर्वतः अधिकं मूल्यवत् वस्तु इति कथितमस्ति तथा च सात्त्विकः मनुष्यः सर्वश्रेष्ठः अस्ति इत्यपि उक्तमस्ति। तस्य लक्षणं विमृशन् आचार्यो मनुः आह–"वेदाभ्यासः

- व्रतानुष्ठानं शास्त्रार्थज्ञानं शुचिता इन्द्रियनिग्रहः धार्मिककर्म- आत्मचिन्तनं च तेषां कर्माणि भवन्ति।"[3]

औपनिषदिकपरम्परायां मनुष्यस्य परमं लक्ष्यं नाम मानवजीवनस्य सम्यक् विकासः, तन्मुखेन निःश्रेयसं प्रति आस्था, सदसदोः भेदविवेकः तथा च उदात्तानां मानवीयमूल्यानाम् आधारेण आचरणम्। कठोपनिषदि श्रेयश्च प्रेयश्च इति मार्गद्वयस्य कथनेन सह प्रेयसः अपेक्षया श्रेयसः स्वीकरणमेव वरम् इति उक्तम् अस्ति।[4] ईशावास्योपनिषद् अपि त्यागपूर्वकं भोगं शिक्षयति, तद्यथा–

**ईशावास्यमिदं सर्वं यत् किंचिज्जगत्यां जगत्।**

**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद् धनम्।।[5]**

उपनिषदः अस्मान् एवं शिक्षयन्ति यत् वयं परस्परं रक्षामः, मिलित्वा एव वयं वीरतापूर्णं कार्यं कुर्याम, अस्माकं ज्ञानम् अध्ययनं विद्या च अस्मान् तेजस्विनः कारयेयुः, वयं परस्परं न असूयेम इत्यादि। मानवीयं मूल्यम् अस्माकं पुरतः मानवतायाः एकम् उत्कृष्टतमम् आदर्शं प्रस्तौति। ज्ञानस्य प्रकाशेन मोहान्धकारेण ग्रस्तं मावनजीवनं ततः सुतरां यथा मुक्तिं लभेत तदर्थं भारतीयाः मनीषिणः उपायान् दर्शितवन्तः सन्ति। अन्धकारस्य उपरि प्रकाशस्य विजयः, कालुष्यस्य उपरि निष्कलुषतयाः आधिपत्यम्, विषमतयाः उपरि समसरसतायाः अधिकारश्च तेषां सन्देशरूपेण प्रवर्तन्ते–

**असतो मा सद्गमय,**

**तमसो मा ज्योतिर्गमय,**

**मृत्योर्माऽमृतं गमय।।[6]**

वस्तुतः भारतीयचिन्तनस्य प्रमुखः प्रतिपाद्यविषयः मानवकल्याणम् एवास्ति। तस्य तर्कसङ्गतव्याख्यायै आध्यात्मिकः उपायः अनुसृतः अस्ति। ऋग्वेदे अनेकानि एतादृशानि स्थलानि विद्यन्ते यत्र सौहार्द्यपूर्णव्यवहाराय कर्ममयजीवनाय च मनुष्याः प्रेरिताः सन्ति।[7] अथर्ववेदे यजुर्वेदे चापि एतत् प्रतिपादितम् अस्ति। श्रीमद्भगवद्गीतायां सर्वभूतहिते रतिः इव उदात्तं मूल्यं प्रतिष्ठितं विद्यते।[8] तत्र दैवसम्पद्भिः विशिष्टस्य पुरुषस्य यत् लक्षणं प्रतिपादितम् अस्ति तद् आदर्शमानवस्य कृते अत्यन्तम् अपेक्षितं विद्यते। गीतायाः आत्मौपम्यदृष्टिः वस्तुतः मानववादिनी एवाऽस्ति।



बृहद्रूपेण मूल्यं द्विविधं भवति–(1) निरपेक्षम्, (2) सापेक्षं च। प्रथमं तावत् सर्वान् अतिक्रम्य निरपेक्षभावेण परोपकाराय अस्मान् प्रेरयन्ति, जीवनं शुद्धैः सात्त्विकैश्च भावैः पूरयति। द्वितीयं सामाजिकम् आर्थिकं राजनीतिकं तदितरं वा सन्दर्भम् अपेक्षते इत्यतः सापेक्षं भवति। मानवीयमूल्यं विवेचयतः आचार्यमनोः काले विसङ्गत्या अन्विते समाजे मानवता असन्तोषेण व्यवस्थया कुण्ठया च सन्त्रस्ता आसीत्। तस्यां स्थितौ आचार्यमनुः मानवजीवनस्य शाश्वतान् गुणधर्मान् अवगतवान् तथा च सृष्टेः कल्याणाय दायित्वं कुशलतया निर्वहन् तात्कालिकसमाजस्य स्वस्थविकासाय तथा च भारतीयसंस्कृतेः प्रतिष्ठापनाय स्वस्य स्मृतिग्रन्थे मानवीयमूल्यानि न्यवेशयत्। एवं क्रमेण आचार्यो मनुः मानवतायाः विकासेन सह मानवीयजीवनमपि व्यचिन्तयत्, एतत् मानवजीवनं केन प्रकारेण लोके परलोके च विकासोन्मुखं स्यात् इति मौलिकं पक्षं विमृशन्ती मनुस्मृतिः जगति सुविख्याता संजाता। अत्र आर्यसंस्कृतेः प्राचीना आचारविचाराः चतुर्भिः वर्णैः सम्बद्धाः सर्वे नियमाश्च समाविष्टाः सन्ति। एष ग्रन्थः एकस्मिन्नेव आधारे धर्मग्रन्थरूपेण नीतिग्रन्थरूपेण तथा च हिन्दुधर्मसम्बद्ध-विधिग्रन्थरूपेण च प्रसिद्धिमधिरोहति। मनुस्मृतौ राज्ञः प्रजानां च जीवनमूल्यविषयकं विस्तृतं विवरणमस्ति। तत्र राज्ञः प्रजानां कृते प्रजानां राज्ञः कृते राज्यस्य च कृते कर्तव्यकर्मणामुल्लेखः विद्यते। समाजे मानवीयजीवनस्य चिन्तनमेव पुरुषार्थ इति आचार्यो मनुर्वदति, पुरुषार्थ एव व्यक्तेः समाजस्य च नवनिर्माता भवति। पुरुषार्थो यथा सांसारिक्या पारलौकिक्या च दृष्ट्या करणीयः तथा तेन नैतिकानाम्-आर्थिकानां मानसिकानां शारीरिकाणामपि मूल्यानां बोधः भवति। तत्र चतुर्विधे पुरुषार्थे प्रथमः पुरुषार्थः धर्मः कथितः, अर्थ-काम-मोक्षेति शिष्टाः त्रयः पुरुषार्थाः धर्माधारिताः स्युरिति इष्यते।

धर्मः भारतीयसंस्कृतेः मूलमन्त्रो विद्यते। तेनैव मनुष्यः स्वस्य समाजस्य च विकासं साधयति। आध्यात्मिकतायाः नैतिकतायाः च समन्वयः एव धर्मः। मानवजीवनस्य विविधानाम् इच्छानाम्, आवश्यकतानां विविधक्रियाणां च नियमित-रूपेण सञ्चालनार्थं धर्मस्यावधारणा कृता विद्यते। धर्माश्रिता हिं मानवीयाः आदर्शाः मूल्यानि च नियमितानि भवन्ति। धर्मः भारतीयदर्शनस्य मूलाधारो विद्यते। एतद्विषये वैदिकाभिप्रायमनुसृत्य आचार्यो मनुराह–

**वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।**

**आचारश्चैव साधूनामात्मनस्तुष्टिरेव च।।[9]**

धर्मः मनुष्यस्य कर्तव्यानि सत्कर्माणि सद्गुणान् च संकेतयति। एषः मनुष्य-गतानाम् इच्छानाम् आवश्यकतानां च प्रसङ्गे औचित्यं साधयति। तेन मनुष्यः तदुचितव्यवहारे सम्यक्तया समर्थो भवति। एतेन कारणेन मनुना धर्मस्य दश लक्षणानि उक्त्वा तेन मुखेन मानवीयमूल्यानि निर्दिशति–

**धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।**

**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।।[10]**

पुनरपि प्रसङ्गेऽस्मिन् मनुराह यत् वेदेषु स्मृतिषु च वर्णितं धर्मं यो जनः आचरति सः इहलोके कृतिं परलोके च श्रेष्ठं सुखं प्राप्नोति।[11] धर्मस्य महत्तां प्रतिपाद्य मुनिः कणादः ब्रूते यत् स एव धर्मः यः अस्मिन् लोके अभ्युदयं परलोके च मोक्षं प्रापयति। महर्षिः कपिलः सांख्यसूत्रे मनुष्यस्य उन्नतिम् अवनतिं च क्रमशः धर्माधर्मयोः मूलमिति मनुते–

**धर्मेण गमनमूर्ध्वं गमनमधस्ताद् भवत्यधर्मेण।।[12]**

एवंप्रकारेण मनुष्यः धर्मेण सांस्कृतिकं जीवनं समुत्थाप्य मानवीयगुणैः युक्तो भवति। तेनैव विश्वकल्याणं भवति। भारतीयमनीषिणः धर्मेण केवलम् आध्यात्मिकी आस्था कर्मकाण्डादि वा अभिप्रेतं नासीत्। धर्मः तद् आन्तरिकं कर्तव्यं निष्ठा वा विद्यते यत् मनुना निर्दिष्टैः दशविधैः मूल्यैः प्रतिपादितम्।

पुरुषार्थेषु द्वितीयः 'अर्थः' अस्ति। एतस्य क्षेत्रं मोक्षं धर्मं चातिशेते। यथा आत्मने मोक्षः, बुद्धये धर्मः, मनसे च कामः अपेक्ष्यते तथा मनुष्यः शरीरधारणाय अर्थम् अपेक्षते। यद्यपि भारतीयैः मनीषिभिः जीवनस्य आन्तरिकं मूल्यमेव प्रमुखं मत्वा धर्मस्य प्राधान्यं प्रदर्शितम्, तथापि तैः अर्थं कामं चेव बाह्यमूल्यं नोपेक्षितम्। तैः आन्तरिकं बाह्यं च मूल्यं आत्मा शरीरं चेव अविभाज्यमिति स्वीकृतम्। अर्थाभावेन मनुष्यः धर्मं पूर्णतया रक्षितुम् अपि अशक्तो भवति। किन्तु आचार्यो मनुः असदुपायेन अर्जितं धनं सर्वदाऽस्वीकार्यमिति मनुते–

**परित्यजेदर्थकामौ यौ स्यातां धर्मवर्जितौ।[13]**

पुनरपि मनुराह यत् किमपि व्यर्थं वस्तु स्वपार्श्वे न रक्षणीयम्, निष्प्रयोजनम् स्थानान्तरं न गन्तव्यम्। नेत्रे नियन्त्रिते स्याताम्। अधिको वार्तालापः न करणीयः, अपरेषां कृते हानिकरं कार्यं न करणीयम्।[14] अर्थकामौ परस्परम् अनुकूलौ स्याताम्।



महाभारतेऽपि त्रिवर्गेषु धर्मस्यैव सर्वातिशायि महत्त्वं प्रदर्शितमस्ति। तदनुसारं धर्मात्मा लोके परलोके च सुखम् अवाप्नोति–

**धर्मे चार्थे च कामे च धर्म एवोत्तरो भवेत्।**

**अस्मिंल्लोके परे चैव धर्मात्मा सुखमेधते।।[15]**

वात्स्यायनः अर्थं लक्ष्यीकृत्य वदति यत् विद्या, भूमिः, सुवर्णं, पशुधनं मित्रमित्यादि सर्वमेव अर्थो विद्यते–

**विद्या भूमिहिरण्यपशुधनधान्यभाण्डोपस्कराः।**

**मित्रादीनाम् अर्जनम् अर्जितस्य विवर्धनमर्थः।।[16]**

अर्थोपार्जनोपायान् एवं दर्शयति आचार्यो मनुः–

**विद्या शिल्पं भृतिः सेवा गोरक्ष्यं विपणिः कृषिः।**

**धृतिर्भक्ष्यं कुसीदं च दश जीवनहेतवः।।[17]**

आचार्य आह यत् स्वस्य असमृद्धिम् असफलतां वा वीक्ष्य कश्चित् आत्मानं हीनं च मन्येत। मृत्युं यावत् अर्थप्राप्तये प्रयासः करणीयः।[18]

एवं प्रकारेण द्वितीयः पुरुषार्थः अर्थः महत्त्वपूर्णमानवमूल्यरूपेण अभिमतोऽस्ति।

पुरुषार्थेषु 'कामः' तृतीयो वर्तते। कामशब्दस्य प्रयोगः सामान्यतः द्विविधो भवति–व्यापकः संकुचितश्चेति। व्यापकार्थे इच्छा-कामनास्पृहा-तृष्णैषणादयः गृह्यन्ते। सङ्कुचितार्थे कामस्य प्रयोगः यौनसुखार्थे क्रियते। कामं लक्षयता वात्स्यायनेनोक्तम्-

**अभिमानिकरक्षानुविद्धिर्यतः सर्वेन्द्रयप्रीतिः स कामः।[19]**

गृहस्थाश्रमं प्रविश्य कश्चित् अर्थं संचिनोति, तेनैव सह सुखकरं दाम्पत्यमपि अनुभवति। अस्मिन्नेव आश्रमे पत्न्या सह दानपुण्यादि धार्मिकं कृत्यमपि सम्पादयति। अत्र कामस्य उपयोगं दर्शयता मनुना उक्तम्–

**अकामस्य क्रिया काचिद् दृश्यते नेह कर्हिचित्।**

**यद् यद्धि कुरुते किंचित् तत्तत् कामस्य चेष्टितम्।।[20]**

कामस्य स्वरूपं विवृण्वता मनुना व्याख्यातं यत् मनुष्यः जन्मत एव सांसारिक-विषयाणां भोगेषु स्वप्राणेषु कुटुम्बादिषु च स्वतः आसक्तो भवति। किन्तु एतेषु आसक्तिः एव तस्य आत्मोन्नतेः बाधिका भवति। अविद्यायाः आवरणेन स्वस्य सुखस्वरूपस्य आत्मनः आवृततया जीवः तस्मात् आत्मसुखात् रहितः सन् आत्मानं दुःखिनं मनुते तथा

च सुखस्य बाह्यविषयान् अन्विष्यति। एतादृशान्वेषणप्रेरणा कामत एव प्राप्यते। एतस्मिन् विषये मनुरुपदिशति यत् कामोपभोगविषये मनसि सन्तोषः पोषणीय इति।

मानवीयमूल्येषु मोक्षः चतुर्थः पुरुषार्थो मन्यते। एषः परमपुरुषार्थोऽपि कथ्यते। एतस्याभिधेयोऽर्थः मुक्तिः अस्ति। एतं लब्ध्वा मनुष्यः सर्वेभ्यो दुःखेभ्यो विमुक्तो भवति। आध्यात्मिकाधिदैविकधिभौतिकेति त्रिविधं दुःखम् अतिक्रान्तुं प्रेरणा मोक्षत एव लभ्यते। जीवने कर्तृत्व-भोक्तृत्व-सुखित्व-दुःखित्वेत्यादयः अनात्मभावाः अविद्ययाऽज्ञानेन वा उत्पद्यन्ते, एतान् परित्यज्य स्वस्य वास्तविके परमात्मस्वरूपे एव विद्यमानता जीवस्य मोक्षपदवाच्या भवति।[21] आचार्यो मनुर्वदति यत् सन्तोऽसन्तो वा पदार्थाः सर्वे प्राणिनः अन्तर्वर्त्तिनः एव भवन्ति। सर्वं स्वात्मनि पश्यन् विवेकी अधर्मात् निवर्तते–

**सर्वमात्मनि संपश्येत् सच्चासच्च समाहितः।**
**सर्वं ह्यात्मनि संपश्यन्नाधर्मे कुरुते मनः।।**[22]

धर्मेणैव मोक्षावस्था प्राप्यते, तथा चाऽऽह आचार्यो मनुः–

**सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि।**
**समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति।।**[23]

श्रेष्ठानां मानवीयमूल्यानां कृते एव मनुष्यः सदैव सत्कर्म आचरति। अतः स्मृतिकाराः यज्ञदानतपस्यासु आत्मज्ञानमेव श्रेष्ठं मन्वते–

**सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम्।।**[24]

मनोः विचारेण मनुष्यः स्वाचरितस्याऽधर्मस्य फलं न केवलं स्वयं भुनक्ति, अपितु तस्य पुत्रपौत्रादयोऽपि तस्य कुपरिणामं भुञ्जन्ति–

**यदि नात्मनि पुत्रेषु न चेत् तत्पुत्रेषु नप्तृषु।**
**न त्वेव तु कृतोऽधर्मः कर्तुर्भवति निष्फलः।।**[25]

एवं प्रकारेण मनुस्मृतौ कर्ममूल्यं स्पष्टतः परिलक्ष्यते, तदाधारेण एव मनुष्यः धर्मयुक्तं कार्यं करोति। वस्तुतः मनुस्मृतिः तादृशं धर्मशास्त्रमस्ति यत् वेदानामनन्तरं चतुर्णां वर्णानाम्, चतुर्णाम् आश्रमाणां, सर्वेषां संस्काराणां च वैशिष्ट्य राजादेः कर्तव्यम् इत्यादीन् च सर्वान् पुरुषार्थान् उपदिशति। एतत् मानवमूल्यस्य कृते महत्त्वपूर्णम् अस्ति।



## सन्दर्भसूची–


1. वामन शिव राम आप्टे, संस्कृत-हिन्दी-कोश, पृष्ट-812
2. डॉ. रंगनाथ पाठक - मानव-मूल्य और प्रसाद का गद्य साहित्य, पृष्ठ-8
3. मनुस्मृतिः 31/12
4. कठोपनिषद् 1/2/2
5. ईशावास्योपनिषद् - 1
6. बृहदारण्यकोपनिषद् 1/3/28
7. ऋग्वेदः 5-60-5 और 5/56/6
8. श्रीमद्भगवद्गीता 5/25
9. मनुस्मृतिः 6/2
10. मनुस्मृतिः 92/7
11. मनुस्मृतिः 9/2
12. कपिलसांख्यसूत्रम्
13. मनुस्मृतिः 176/2
14. मनुस्मृतिः 177/2
15. महाभारत-शान्तिपर्व 91/-92
16. वात्स्यायन-कामसूत्रम्।
17. मनुस्मृतिः 117/10
18. मनुस्मृतिः 137/4
19. वात्स्यायन-कामसूत्रम्।
20. मनुस्मृतिः 4/2
21. श्रीमद्भागवतम् 10/2
22. मनुस्मृतिः 118/12
23. तत्रैव 91/12
24. तत्रैव 85/12
25. तत्रैव 173/9

# किञ्चित् पारिभाषिकम्

**काशिकावृत्तौ अष्टाध्यायीगतानां सूत्राणां शब्दाः यथा परिभाषिताः तथा सूत्र-तत्संख्योल्लेखपुरःसरम् अध्यायक्रमेणात्र संगृह्यन्ते।**

**अ. = अष्टाध्यायी। वा. = वर्तिकम्**

| | |
|---|---|
| निर्धारणम् | जातिगुणक्रियाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणम्। |
| | अ. न निर्धारणे 2.2.10 |
| चार्थाः | समुच्चयान्वाचयेतेरतरयोगसमाहाराश्चार्थाः। (परस्परनिरपेक्षस्यानेकस्य एकस्मिन्नन्वयः समुच्चयः. अन्यतरस्य आनुषङ्गिकत्वेऽन्वाचयः। मिलितानामन्वयः इतरेतरयोगः। समूहः समाहारः. -सिद्धान्तकौमुदी) |
| | अ. यार्थे द्वन्द्वः 2.2.29 |
| अत्यन्तसंयोगः | क्रियागुणद्रव्यैः साकल्येन कालाध्वनोः सम्बन्धः अत्यन्तसंयोगः। |
| | अ.कालाध्वनोरत्यन्तसंयोगे 2.3.5 |
| अपवर्गः | अपवर्गः फलप्राप्तौ सत्यां क्रियापरिसमाप्तिः। |
| | अ. अपवर्गे तृतीया 2.3.6 |
| प्रतिनिधिः | मुख्यसदृशः प्रतिनिधिः। |
| प्रतिदानम् | दत्तस्य प्रतिनिर्यातनं प्रतिदानम्। |
| | अ. प्रतिनिधिप्रतिदाने च यस्मात् 2.3.11 |
| अनादरः | अनादरः तिरस्कारः। |
| | अ. मन्यकर्मव्यनादरे विभाषाऽप्राणिषु 2.3.17 |
| इत्थंभूतः | कञ्चित्प्रकारं प्राप्तः इत्थभूतः। |
| | अ. इत्थभूतलक्षणे 2.3.2 |
| हेतुः | फलसाधनयोग्यः पदार्थो लोके हेतुरुच्यते। |
| | अ. हेतौ 2.3.23 |
| भावः | भावः क्रिया। |
| | अ. यस्य च भावेन भावलक्षणम् 2.3.37 |



# शक्तिविषयको विचारः

**डॉ. शरदिन्दु कुमार त्रिपाठी**

एवं हि दृश्यते लोके शब्दश्रवणात् अर्थोपस्थितिर्भवति, अर्थस्य गवादेः दर्शनात् शब्दस्मृतिर्भवतीति, अतः शब्दार्थयोः कश्चन सम्बन्धः अस्ति इति निश्चीयते। स च सम्बन्धः व्याकरणन्यायादिषु शास्त्रेषु क्वचित् वृत्तिपदेनाभिहितः क्वचिच्च शक्तिपदेनेति। वृत्तिपदार्थश्च वर्तते = शब्दः अर्थे प्रवर्तते अनया इति वृत्तिः पदपदार्थयोः सम्बन्धः। नैयायिकाश्च शाब्दबोधजनकोपस्थितिजनकपदपदार्थसम्बन्धत्वं वृत्तित्वमिति निगदन्ति। इत्थं वृत्तिः पदपदार्थयोः सम्बन्ध एव। सा एव आलङ्कारिकैः शक्तिपदेन अभिधीयते। तथाहि आचार्यविश्वनाथः साहित्यदर्पणे–

**वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः।**
**व्यङ्ग्यो व्यञ्जनया तास्युस्तिस्त्रः शब्दस्य शक्तयः।।**

इत्यञ्च शक्यते अर्थो ज्ञातुमनया इति शक्तिः। शक्-धातोः क्तिनि प्रत्यये कृते शक्तिशब्दः निष्पद्यते, सा च शक्तिस्त्रिधा, अभिधा, लक्षणा व्यञ्जना च। तत्र आद्या शक्तिः अभिधा, इयमभिधा नैयायिकैः शक्तिपदेन व्यपदिश्यते। तथाहि गदाधरभट्टाचार्यः शक्तिवादे "सङ्केतो लक्षणा चार्थे पदवृत्तिः" इति उक्तवान्। तत्र अभिधा सङ्केत-पदेन व्यपदिष्टा। सा च अस्मात् पदात् अयमर्थो बोद्धव्यः इत्याकारिका पदप्रकारिका अर्थविशेष्यिका अथवा विनिगमनाभावात् इदं पदं अमुमर्थं बोधयतु इत्यर्थप्रकारिका पदविशेष्यिका वा ईश्वरेच्छा शक्तिः। अतः द्विविधापि इयमीश्वरेच्छा शक्तिः। आलङ्कारिकाश्च सङ्केतितार्थबोधिका शक्तिरभिधा इति मन्यन्ते तथाहि आचार्यमम्मटः- -"स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते" साक्षात्सङ्केतितश्चार्थः चतुर्विधः, सङ्केतितश्चतुर्भेदो जात्यादिः जातिरेव वा, तत्र जातिरेव पक्षः मीमांसकानाम्, जात्यादिः पक्षः क्रियाशब्दाः यदृच्छाशब्दाः इति चतुर्विधाः शब्दाः दृश्यन्ते, अतः "चतुष्टयी शब्दानां प्रवृत्तिः" इति महाभाष्यकारः। यद्यपि लोकव्यवहाराय वाक्यं प्रयुज्यते

व्यवहारनिष्पत्तिश्च व्यक्त्या एव भवति न तु जात्या, अतः व्यक्तौ एव सङ्केतः, कर्तुमुचितम् परं व्यक्तीनाम् आनन्त्यात् व्यभिचाराच्च व्यक्तौ सङ्केतः कर्तुं न युज्यते अतः जातिवाचकशब्दानां जातौ व्यक्तेरुपाधौ एव सङ्केतः।

तत्र मीमांसकैः शक्तिः पदार्थान्तरमिति स्वीक्रियते। तेषामयमभिप्रायः यत् कारणेषु कार्यानुकूला शक्तिः वर्तते। सा च कारणात् पृथक्। एवं दृश्यते लोके यादृशेन वह्निना दाहो जन्यते तादृशेनैव वह्निना मणिमन्त्रौषधिसन्निहितेन दाहो न जन्यते, पुनः उत्तेजकसूर्यकान्तमणिसमवहितेन दाहो जायते। अतः निश्चीयते यत् मणिमन्त्रादिभिः वह्निवृत्तिदाहानुकूला शक्तिः नश्यति। अतः कार्यमात्रं प्रति तत्तत्-कारणेषु कार्यानुकूला शक्तिः काम्यते। सा च पदार्थान्तरं द्रव्यगुणकर्मसामान्यविशेष-समवायाभावादिषु सप्तपदार्थेषु अनन्तर्भावात्। यतो हि शक्तिः स्पर्शरहिता अतः स्पर्शविशिष्टेषु पृथिव्यप्तेजोवायुषु नान्तर्भूता, उत्पादविनाशशालित्वेन आकाशादिषु पञ्चसु नित्यद्रव्येषु तस्याः नान्तर्भावात्। कपालादिरूपादिषु घटरूपाद्युत्पादकशक्ति-सत्त्वात् न गुणकर्मणोरन्तर्भावः। सामान्यादिषु विनाशशालित्वादेव नान्तर्भावः अतः भावरूपत्वात् शक्तिः अतिरिक्तः पदार्थः।

वेदान्तिनोऽपि अत्रानुकूलाः, तथाहि पञ्चदश्यां–

**शक्तिः शक्तात् पृथङ् नास्ति तद्वद् दृष्टेन चाभिधा।**
**प्रतिबन्धस्य दृष्टत्वात् शक्त्यभावे तु कस्य सः।।**

अर्थात् शक्तिः शक्तिमतः पृथङ् नास्ति, शक्तिविशिष्टस्यैव शक्तिमतः उपलब्धेः। शक्तिमतः पृथक् शक्तेः अनुपलब्धेः, शक्तेश्च प्रतिबन्धस्य दृष्टत्वात्।

प्रभाकराः निगदन्ति प्रकरणपञ्चिकायां शक्तिनिरूपणे यत् यद्यपि शक्तिः न प्रत्यक्षगोचरीभूता, तथापि कार्येण अनुमीयते। यद्रूपात् अग्नेर्दाहो जायते तद्रूपादेव मणिमन्त्रादिसमवधाने सति दाहो न जायते। भावकार्यं प्रति भावकारणस्य नियतत्वात् दाहरूपकार्योत्पत्तौ मणिमन्त्राद्यभावो न निमित्तम् अभावस्य क्वचिदपि कार्ये जनकतानुप-पत्तेः। अतः अग्नेः स्वरूपद्वयं प्रत्यक्षम् अतीन्द्रियं च। यच्च अतीन्द्रियं तदेव शक्तिसामर्थ्यादिशब्दवाच्यम्। शक्तेः कदाचित् अविभवः, कदाचिच्च विनाशो भवति, यत्र कदापि कार्यं नोत्पद्यते तत्र विनाशः यत्र प्रतिकारवशेन कार्योदयः तत्र अविभवः। सा चेयं शक्तिः त्रिधा सहजा, आधेयजा, शब्दनिष्ठा च। आग्नेयादौ दाहिका शक्तिः सहजा,



मन्त्रादिना मूर्तौ देवत्वादिसम्पादिका शक्तिः आधेयजा, अर्थबोधकजनकतावच्छेदकधर्मरूपा शक्तिः शब्दनिष्ठा। सहजा शक्तिः अज्ञाता सती उपयुज्यते। शब्दनिष्ठा (अभिधा) ज्ञाता सती उपयुज्यते।

**शब्दशक्तिमीमांसा**

तत्र भाट्टमते "शब्दनिष्ठो बोध्यबोधकतारूपोऽभिधेयाऽभिधायकत्वरूपो वा सम्बन्धः शक्ति"। प्रभाकरमते शब्दस्य अर्थेन सह अपौरुषेयः प्रत्याय्यप्रत्यायकभावरूपः सम्बन्धः शक्तिः। शक्तिः अभिधा इत्यनर्थान्तरम्।

नैयायिकाश्च प्रतिबन्धकाभावस्य सामान्यकारणं स्वीकृत्य कारणेषु अतिरिक्तां कार्यानुकूलां शक्तिं नाङ्गीकुर्वन्ति। त एवं निगदन्ति यत् दाहं प्रति न केवलम् अग्निः कारणं, प्रत्युत प्रतिबन्धकाभावविशिष्टः अग्निः कारणम्। अग्नेर्दाहं प्रति मण्यादयः प्रतिबन्धकाः सन्ति, अतस्तेषामभावः आवश्यकः। परम् उत्तेजकाभावविशिष्ट-मण्याद्यभावविशिष्टस्य वह्नेः दाहं प्रति कारणतास्वीकारात् प्रतिबन्धकमणिसमवधानेऽपि उत्तेजके सति वह्नेः दाहरूपकार्योत्पत्तौ न काचित् अनुपपत्तिः। अनन्तशक्तीनां तत्प्रागभावध्वंसानां कल्पनापेक्षया प्रतिबन्धकाभावविशिष्टस्यैव कारणतास्वीकारे लाघवात्। अत्र अभावो न कारणमिति न शङ्क्यम्, यतो हि यथा भावपदार्थात् अभाव उत्पद्यते तथैव अभावपदार्थात् भावोऽपि उत्पद्यते। तदुक्तं न्यायकुसुमाञ्जलि-इत्याख्ये ग्रन्थे–

'भावो यथा तथाऽभावः कारणं कार्यवन्मतम्।' इत्थं नैयायिकानां मते शक्तिः अतिरिक्तः पदार्थः नास्ति, अपितु ईश्वरेच्छारूपा शक्तिः। इच्छा च गुण एव। ईश्वरेच्छा एका, नित्या च वर्तते, तस्याः विषयः यथा घटः तथा पटादिकं सर्वं वस्तुजातम्। अतः घटपटाभिधेयः पटादिरपि स्यात् शङ्कानिरासाय व्यक्तिविशेषमुपाधीकृत्य घटपटाभिधा स्वीकरणीया अर्थात् घटपदात् बोद्धव्यो घटः इत्यादि घटपटाभिधा स्वीकरणीया। अर्थात् घटपदात् बोद्धव्यो घटः इत्यादि घटादिरूपव्यक्तिविशेषोपाधानेन ईश्वरेच्छायाः तत्पदाभिधा-स्वीकारे एका नित्यापि ईश्वरेच्छा उपाधिभेदेन भिन्ना सती घटोपहिता घटमात्र एव विषयतया तिष्ठन्ती पटादिकं न विषयीकरोति।

"शक्तिः विषयतासम्बन्धेन पदे अर्थे ज्ञाने च वर्तते तथापि बोधनिष्ठजन्यता-निरूपितजनकतावत्सम्बन्धेन शक्तिविषयो वाचकः पदजन्यबोधविषयत्वसम्बन्धेन शक्तिविषयो वाच्यः इति नातिप्रसक्तिः।" (शक्तिनिरूपणे नागेशः लघुमञ्जूषायाम्)

इयं शक्तिः आधुनिके देवदत्तादिनाम्नि अपि वर्तते। "एकादशेऽह्नि पिता जातस्य पुत्रस्य नाम विदध्यात्" इति श्रुतिरूपायाः ईश्वरेच्छायाः तत्रापि सत्त्वात्। परम् आधुनिकैः संकेतितेषु डित्थडवित्थादिषु, पाणिनिकृतासु 'टि' 'घु' भादिषु संज्ञासु नास्ति शक्तिः किन्तु पारिभाषिका इमे शब्दाः इति साम्प्रदायिकाः।

नव्यनैयायिकानां मते ईश्वरेच्छारूपशक्तिस्वीकारे ईश्वरमनङ्गीकुर्वतां शक्तिबोधो न स्यात्, अतः इच्छामात्रे शक्तिः। अतः आधुनिकसंकेतिते नदीवृद्ध्यादिपदेऽपि शक्तिरस्त्येव।

वैयाकरणाश्च

**इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।**

**अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा।।**(वैया. भूषणसारः)

इति निगदन्ति। स च सम्बन्धः वाच्यवाचकभावापरपर्यायः। स एव शक्तिः। तद्ग्राहकं च इतरेतराध्यासमूलकं तादात्म्यम्। शब्दार्थयोः तादात्म्यञ्च गौरिति शब्दः, गौरिति अर्थः गौरिति ज्ञानम् इति अनुभवात् सङ्केतश्च स्मृत्यात्मकः योऽयं शब्दः सोऽर्थः, योऽर्थः स शब्दः इति महाभाष्योक्तिः। तादात्म्यञ्च तद् भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम्। किन्तु भिन्नयोः अभेदप्रतीतिः कथम्? अध्यासात्। यत्र भेदः उद्भूतः तत्र मम कर्णः बधिरः इतिवत्। अस्य शब्दस्य च अयमर्थः इति षष्ठी भवति। यत्र भेदः तिरोहितः तत्र अहं बधिरः इतिवत् गौरिति शब्दः गौरिति अर्थः ज्ञानम् इति व्यवहारः। तादात्म्यस्य भेदाभेदघटितत्वेन अग्निशब्दोच्चारणेन न मुखदाहापत्तिः। वस्तुतस्तु बौद्धः शब्दः बौद्धः अर्थः। बौद्धपदार्थाच्च न दाहापत्तिः मतेऽस्मिन् सङ्केत एव न शक्तिः अपितु शक्तिग्राहकः सङ्केतः। शक्तिश्च वाच्यवाचकभावरूपः अखण्डः अतिरिक्तः पदार्थः। अत्र पक्षे सम्बन्धो हि सम्बन्धि-द्वयभिन्नत्वे सति द्विष्ठत्वे सति आश्रयतया विशिष्टबुद्धिनियामक इति वृद्धव्यवहारोऽपि संगच्छते। इच्छा तु न विशिष्टबुद्धिनियामिका, इच्छावान् शब्दः इच्छावान् अर्थः इति व्यवहाराभावात्। स च सम्बन्धः पदे वाक्ये च। तदुक्तं न्यायभाष्यकारैः–"समयज्ञानार्थं चेदं पदलक्षणायाः वाचोऽन्वाख्यानं व्याकरणम्। अर्थलक्षणायाः वाचोऽर्थलक्षणम्।"

**आलङ्कारिकमतम्**

आलङ्कारिका अपि शक्तिम् अतिरिक्तं पदार्थं मन्वते। सङ्केतश्च शक्त्या अर्थबोधने सहकारिकारणं मन्यन्ते। सङ्केतग्रहसहायेनार्थबोधिका शक्तिः अभिधा इति। "समयापेक्षयाऽर्थावगमनशक्तिर्ह्यभिधा" इति लोचनोक्तेः। 'साक्षात्सङ्केतितं



योऽर्थमभिधत्ते स वाचकः'- इत्याद्युक्तेः मम्मटोऽपि अनुकूल एव। पण्डितराजोऽपि "शक्त्याख्योऽर्थस्य शब्दगतः शब्दस्यार्थगतः सम्बन्धविशेषोऽभिधा" इति निरूप्य सा च पदार्थान्तरमिति केचित् इति आह। तत्र इदमेव मतं ज्यायस्त्वेनाङ्गीकृतवान् रसगङ्गाधरे। अप्पयदीक्षितश्च वृत्तिवार्तिके "शक्त्या प्रतिपादकत्वमभिधा" इति लक्षणं प्राह।

**शक्त्याश्रयविवेकः**–नैयायिकाः संस्कृतशब्द एव शक्तिं स्वीकुर्वन्ति नापभ्रंशेषु। अपभ्रंशेषु शक्तिस्वीकारे गौरवापत्तेः। एकस्यैव शब्दस्य बहूनामपभ्रंशानां सत्त्वात्। यथा एकस्यैव गोशब्दस्य गावी गोणी गोता गोपोतलिकेति एवमादयः बहवोऽपभ्रंशाः (महाभाष्यम्) अपभ्रंशेषु अर्थप्रतीतिः व्युत्पन्नानां साधुशब्दस्मरणात्, पामराणां च शक्तिभ्रमात्। तदुक्तं भर्तृहरिणा तन्मतं पुरस्कुर्वता–

**ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः।**

**तादात्म्यमुपगम्यैव शब्दार्थस्य प्रकाशकः।।**

एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते।

वैयाकरणास्तु अपभ्रंशेष्वपि शक्तिं स्वीकुर्वन्ति। तेषाम् इयं वाचो युक्तिः यदि अपभ्रंशेषु शक्तिः न स्यात् तदा तेभ्यः बोधोऽपि न स्यात्। न च अपशब्देभ्यः साधुशब्दस्मृतिः ततो बोधः इति वाच्यम्, साधुशब्दमजानतां पामराणां बोधाभावप्रसङ्गात् न च शक्तिभ्रमात् तेषां बोध इति शङ्कनीयम् अबाधप्रतीतेः। अतः भाषाशब्देष्वपि शक्तिरस्त्येव। तदुक्तं हरिणापि–

**वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः** (वाक्यपदीयम्)। आलङ्कारिकास्तु अपभ्रंशेष्वपि शक्तिं स्वीकुर्वन्ति, अतएव मम्मटः वाच्यार्थस्य व्यञ्जकत्वे भाषापद्यम् उदाजहार–माए घरो. . .।

**शक्तिग्राहकाः**

**शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।**

**वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।।**

धातुप्रत्ययादीनां शक्तिग्रहः व्याकरणात् भवति। उपमानात् गोशब्दसदृशो गवय इति श्रुत्वा अरण्यं गतो गवयं विलोक्य गोसदृशो गवय इति पदवाच्यं स्मरति। ततो गवयः

गवयपदवाच्यः इति बोधः उपमित्या जायते। कोशाद्-स्वरव्ययं. . .त्रिदशालयः एते सर्वे समानार्थकाः स्वर्गार्थाः। आप्तवाक्यात् यथा अङ्गुल्या निर्दिश्य अयं पदार्थः गोपदवाच्यः। व्यवहारतश्च यथा उत्तमवृद्धेन गामानय इति उक्तम्, तदाकर्ण्य प्रयोज्यवृद्धेन आनीतां गां विलोक्य बालः अस्य वाक्यस्य गवानयनरूपमर्थमवधारयति। पश्चात् आवापोद्वापाभ्यां तत्तत्पदस्य तत्तदर्थमवधारयति। व्यवहार एव शक्तिग्राहकेषु शिरोमणिः। एवमन्येषामपि अर्थाः अवधारणीयाः।

**सङ्केतार्थनिरूपणम्**

मीमांसकेषु व्यक्तौ शक्तिस्वीकारे व्यक्तीनाम् आनन्त्यात् शक्यतावच्छेदकानत्यम् इति आनन्त्यदोषः। सर्वासां व्यक्तीनामेकत्रानुपलम्भात् सर्वासु सङ्केतग्रहः असम्भव एव। अतः जातौ एव शक्तिः सर्वेषां शब्दानाम्। ते व्यक्तिबोधं केचन लक्षणया अपरे आक्षेपात् अभेदात् वा कुर्वन्ति।

वैयाकरणाः आलङ्कारिकाश्च चतुष्टयी शब्दानां प्रवृत्तिः इति स्वीकृत्य जातिगुणक्रियादिषु सङ्केतग्रहं मन्यन्ते। नैयायिकाः जातिविशिष्टव्यक्तौ सङ्केतग्रहं स्वीकुर्वन्ति। बौद्धानां मते सर्वं क्षणिकम् अतः नित्या जातिः अस्त्येव न। व्यक्तिरपि क्षणे क्षणे परिवर्तते अतः सङ्केतग्रहकाले या व्यक्तिः प्रयोगकाले सा परिवर्तिता। अतः न जातौ शक्तिः न वा व्यक्तौ। तेषां मते **अपोहः शब्दार्थः**। अपोहश्च अतद्व्यावृत्तत्वं तद्भिन्नभिन्नत्वं वा।

**अभिधाभेदाः**

क यत्र अवयवार्थकप्रतिभासः तत्र यौगिकं यथा पाचकपदम्। अत्र पच् धातोः पाकः अर्थः ण्वुल्प्रत्ययस्य कर्ता अर्थः।

ख यत्र अवयवार्थनिरपेक्षसमुदायशक्तिमात्रेणार्थबोधः तत्र रूढं यथा गोमण्डलम्।

ग यत्र अवयवशक्तिविषये समुदायशक्तिः भासते तत्र योगरूढं यथा पङ्कजादिः।

घ यत्र अवयवार्थसमुदायार्थयोः स्वातन्त्र्येणावबोधः तत्र यौगिकरूढं यथा वारिवाहादिपदम्।

**उपसंहारः** वस्तुतस्तु शब्दस्य साक्षात् एका एव वृत्तिः सा च अभिधा इति प्राचीनवैयाकरणाः, अभिधावादिनः मीमांसकाः, आलङ्कारिकेषु महिमभट्टाः च डिंडिमघोषेण उद्घोषयन्ति। अन्याः याः वृत्तयः शक्त्यः वा तास्तु अर्थमपेक्षन्त एव।

◎



# शास्त्रेषु ओंकारविमर्शः

डॉ. द्रोणाचार्य पाण्डेयः

अस्माकं धर्मे अतीव सुप्रतिष्ठितः 'ओम्' शब्दः। अस्य माहात्म्यं सर्वोत्तमं वर्तते। कथ्यते यत् 'मन्त्राणां प्रणवः सेतुः।'

ध्यातव्यं यत् ऋग्वेदकाले 'ओम्' शब्दः व्यवहारे न आसीत् यतो हि ऋग्वेदे 'ओम्' शब्दः कुत्रापि न दृश्यते। केवलं यजुर्वेदस्य अन्तिमे अध्याये 'ओम्' शब्दः प्रयुक्तः। तथ्यमस्ति यत् यजुर्वेदस्य अन्तिमः अध्यायः स एव अस्ति यः उपनिषत्सु 'ईशोपनिषत्' इति नाम्ना प्रसिद्धः अस्ति। पश्चाद् एषः यजुर्वेदे सम्मिलितः अभवत्। यजुर्वेदस्य एतस्य अध्यायस्य मन्त्राणां विनियोगः नास्ति यद्यपि अन्येषां सम्पूर्ण-वैदिकमन्त्राणां विनियोगः कर्मकाण्डे लभ्यते–

**"ईशावास्यमित्यादिमन्त्राणां कर्मसु विनियोगो नास्ति।"** -महीधरः

सारांशतः स्पष्टमिदं यत् संहिताकाले 'ओम्' इत्यस्य दर्शनं न भवति।

संहिताकालानन्तरं ब्राह्मणकालः अस्ति। ब्राह्मणकाले वैदिककर्मकाण्डं, यज्ञ-यागादिकप्रक्रियाव्याख्यार्थं ब्राह्मणग्रन्थाः व्यवस्थिताः कृताः। ब्राह्मणग्रन्थेषु 'ओम्' शब्दस्य दर्शनं भवति। यथा–

**तानि. . . . . त्रयो वर्णा अजायन्ताकार उकारो मकार इति तानेकधा समभरत्तदेतदोमिति. . .।** –ऐत. ब्रा. - 25.7

गोपथब्राह्मणस्य पूर्वभागस्य प्रथमप्रपाठकस्य षोडशतः त्रिंशत्पर्यन्तं कण्डिकानां नाम एव प्रणव–उपनिषत् इति। ग्रन्थेऽस्मिन् इन्द्रः प्रजापतिं पृच्छति–भगवन्, ओङ्कारः किमिति? प्रजापतिना कथितम्–

**ओङ्कारः–या सा प्रथमा मात्रा ब्रह्मदेवत्या – द्वितीया मात्रा विष्णुदेवत्या-तृतीया मात्रैशानदेवत्या. . .।** –गोपथ ब्रा. - 1.25

तदनु ब्राह्मणकाले 'ओम्' इत्यस्य आविर्भावः अभवत्। अथ ओङ्कारः

मन्त्रेषु यज्ञप्रक्रियाभिः साकं व्यवहृतः। यथा–

**ओमित्यध्वर्युः प्रतिगरं गृणाति। ओमिति ब्रह्मा प्रस्तौति। ओमित्यग्नि-होत्रमनुजानाति।** –तैत्ति. उप. 1-8

कालान्तरे याज्ञिकप्रक्रियया सह वेदमन्त्रादौ तदन्ते च 'ओम्' इत्यस्य व्यवहारः निश्चितः अभवत् तथा सूत्रबद्धः कृतः। यथा–

**'ओङ्कारः स्वाध्यायादौ।'** –शुक्लयजुःप्रातिशाख्यम् - 1,16

**ओंकारः स्वाध्यायादौ कर्तव्य इति सूत्रशेषः।** –भाष्यकार उवटः

**प्रणवष्टेः।** –पाणिनिः, अष्टा. 8.2.89

अर्थात् यज्ञकर्मणि टेरोमित्यादेशः स्यात्।

**अचोऽन्त्यादि टि।** -पा.अष्टा. 1.1.64

अर्थात् अचः अन्त्यादि टि। अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात्।

उपर्युक्तपाणिनिसूत्राणां सारः वर्तते यत् वेद - मन्त्र - यज्ञकर्मणि पठनकाले 'ओम्' युक्तरूपे समाप्तः भविष्यति। यथा यजुर्वेदमन्त्रस्य अन्तिमः अंशः–'अपां रेतांसि जिन्वति' इति पठनकाले अनेन उच्चरितः भविष्यति, –'अपां रेतांसि जिन्वत्योम्।'

उपनिषत्काले 'ओम्' शब्दः अति व्यापकः अभवत्। स्वाध्याये यज्ञादिक-कर्मकाण्डे चैव न केवलम् अपितु सामान्यकथोपकथने अपि स्वीकारोक्तिः-आम् अर्थसूचकभावनायाम् 'ओम्' इत्यस्य प्रयोगः दृश्यते–

**प्रति शुश्रावानुशिष्टोन्वसि पित्रेत्योमिति होवाच।** – बृहदा. उप. 6.2.1

'ओम्' उपनिषत्काले अतीव व्यापकरूपे सम्पर्कितः अभवत्। अन्ते अस्य प्रयोगः महत्त्वपूर्णरूपे सुप्रतिष्ठितः बभूव। यथा–

**"प्रजापतिर्लोकानभ्यतपत् तेभ्योऽभितप्तेभ्यस्त्रयी विद्या सम्प्रास्रवत्ताम-भ्यतपत्तस्या अभितप्ताया एतान्यक्षराणि सम्प्रास्रवन्तः भूर्भुवः स्वरिति।"**

–छा. उप. 2.23



'ओम्' इत्यस्य इदं सुव्यवस्थितं रूपं मनोहरं महिमपूर्णञ्च आसीत्। पुनः अस्य वेदान्तानुकूलप्रस्फुटितविवेचना माण्डूक्योपनिषदि अनेन प्राप्यते-

**सर्वं ह्येतद् ब्रह्मायमात्मा ब्रह्म सोयमात्मा चतुष्पाद्।**

"सोऽयमात्मा अध्यक्षरमोङ्कारः अधिमात्रपादा मात्रामात्राश्च पादा अकार उकारो मकार इति। जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्रा. . .। स्वप्नस्थानो वैश्वानरोऽकारः प्रथमा मात्रा. . .। स्वप्नस्तैजस उकारो द्वितीया मात्रा। सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा। अमात्रश्चतुर्थोऽव्यवहार्य. . .अद्वैत एवमोंकार. . . .।"

सम्प्रति 'ओम्' इत्यस्य उद्भावनायाः पश्चात् यथा-यथा अस्य माहात्म्यं वर्धते तथा-तथा वेदेषु अभावः दृश्यते एव। अतः वेदमन्त्रेषु 'ओम्' इत्यस्य संगति-प्रयत्नस्य प्रमाणम् प्राप्यते। निरुक्तकारः यास्कः ऋग्वेदमन्त्रव्याख्याक्रमे 'ओम्' इत्यस्य सम्बन्धं दर्शितवान्–

**चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।**
**गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति।।**

कतमानि तानि चत्वारि पदानि? ओङ्कारो महाव्याहृतयश्चेत्यार्षं नामाख्याते चोपसर्गनिपाताश्चेति वैयाकरणः।

सारांशतः 'ओम्' इत्यस्य सम्बन्धः वेदे नास्ति। संहिताकालानन्तरं उद्भूत-कारणादेव वैदिकसाहित्ये ब्राह्मण-आरण्यक-उपनिषदादिषु 'ओम्' समादरं प्राप्तवान्।

# किञ्चित् पारिभाषिकम्

> काशिकावृत्तौ अष्टाध्यायीगतानां सूत्राणां शब्दाः यथा परिभाषिताः तथा सूत्र-तत्संख्योल्लेखपुरःसरम् अध्यायक्रमेणात्र संगृह्यन्ते।
>
> अ. = अष्टाध्यायी। वा. = वर्तिकम्

| | |
|---|---|
| आयुक्तः | आयुक्तो व्यापारितः। |
| कुशलः | कुशलो निपुणः। |
| आसेवा | आसेवा तात्पर्यम्। |
| | अ. आयुक्तकुशलाभ्यां चासेवायाम् 2.3.40 |
| निर्धारणम् | जातिगुणक्रियाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणम्। |
| | अ. यतश्च निर्धारणम् 2.3.41 |
| विभक्तम् | विभागो विभक्तम्। |
| | अ. पञ्चमी विभक्ते 2.3.42 |
| प्रातिपदिकार्थः | प्रातिपदिकार्थः सत्ता। (नियतोपस्थितिकः प्रतिपदिकार्थः-सिद्धान्तकौमुदी) |
| | अ. प्रतिपदिकार्थ 2.3.46 |
| सम्बोधनम् | आभिमुख्यकरणं सम्बोधनम्। |
| | अ. सम्बोधने च 2.3.47 |
| शेषः | कर्मादिभ्योऽन्यः प्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषः। |
| | अ. षष्ठी शेषे 2.3.50 |
| अविदर्थः | प्रवृत्तिवचनो जानातिरविदर्थः। अथवा मिथ्याज्ञानवचनः। |
| | अ. ज्ञोऽविदर्थस्य करणे 2.3.51 |
| अधीगर्थः | अधीगर्थाः स्मरणार्थाः। |
| | अ.अधीगर्थदयेशां कर्मणि 2.3.52 |
| प्रतियत्नः | सतो गुणान्तराधानं प्रतियत्नः। |
| | अ. कृञः प्रतियत्ने 2.3.53 |
| एकवचनम् | एकस्य वचनम् एकवचनम्। एकस्यार्थस्य वाचको भवतीत्यर्थः। |
| | अ. द्विगुरेकवचम् 2.4.1 |
| अनुवादः | प्रमाणान्तरावगतस्यार्थस्य शब्देन सङ्कीर्तनमात्रम् अनुवादः। |
| | अ. अनुवादे चरणानाम् 2.4.3 |



## पुस्तकसमीक्षा

**ईश्वरदर्शनम्**

**अथवा**

**तपोवनचरितम्**

**समीक्षकः डॉ. सुनीलकुमारप्रधानः**

पुस्तकस्य नाम-ईश्वरदर्शनम् अथवा तपोवनचरितम्, रचयिता स्वामी तपोवनम्, प्रकाशकम्-चिन्मय इण्टरनाषणल् फौण्डेषन्, आदिशङ्करनिलयम्, वेलियनाट् अर्नाकुलं जिला, केरलम्-682319, प्रकाशनवर्षम्-2006, मूल्यम्-250 रूप्यकाणि, पृष्ठसङ्ख्या-357.

अद्यतनसंस्कृतकाव्यग्रन्थनसरिणिषु अन्यतमं सोपानं विद्यते इदं ग्रन्थरत्नम् 'ईश्वरदर्शनमथवा तपोवनचरितम्'। प्रणेता खलु स्वामी तपाव वेदान्तमहावनकेसरीति कश्चन तत्त्वग्राही। ग्रन्थोऽयं खण्डद्वये विभक्तः किञ्चात्र विंशत्युल्लासाः विद्यन्ते। मूलतः रचनेयं श्रीस्वामितपोवनस्यात्मचरितमेव। महात्मनां जीवनचरितश्रवणपठनात् स्वस्थसक्रियजीवननिर्माणमेवास्य ग्रन्थस्य मूलभूतं लक्ष्यम्। आत्मकथारूपमीदृशं काव्यं संस्कृतभाषायां न्यूनमात्रेण प्राप्यते इत्यतः ग्रन्थोऽयं विबुधमण्डले ख्यातो भविष्यतीति निश्चप्रचम्।

अस्मिन् ग्रन्थे गद्यपद्ययोः मञ्जुलमङ्गलयोगः दृश्यते पुनश्च प्रतिखण्डे उल्लासाः विद्यन्ते। अतः गद्यपद्यमयमिदं चम्पूकाव्यमिति वक्तुं शक्नुमः। इह हि लौकिकजीवनवृत्तं तु अस्त्येव पारलौकिकसाधनामार्गोऽपि निरूपितः स्वामिना तपोवनेन। एकत्र गद्ये बाणभट्टस्य प्रभावः त्वन्यत्र पद्ये कालिदासात् प्रभावितोऽस्त्ययं मनस्वी कविः। गद्ये पाञ्चाली पद्ये च वैदर्भी रीतिः काव्यरसिकानां चेतांसि हरति। अत्र कानिचन आस्वाद्यस्थलानि-'तथाहि साक्षाच्छ्रीशङ्करभगवत्पादामुत्पत्तिभूमित्वेन

सुप्रथितं कालटिग्राममध्यक्षयितुमुत्कण्ठितमना.........श्रीशङ्करचरणावत्नरपवित्रितं कालटिग्राममव्राजीत्।' प्रसङ्गोऽयं काव्यस्य प्रथमखण्डे देशाटनक्रमे विद्यते। एवम्प्रकारेण अन्यान्यपि गद्यस्थलानि द्रष्टव्यानि। ततश्च पद्ये–

यावन्मनो बहुनिमित्तिककामनासु
तातप्यतेऽन्यतमयापि द्रवाग्निमेव।
तावन्नरस्य सुखशान्तिरथा कथं स्यात्
तावच्च दैवगुणवान् कथमेष शिष्टः।। (1.5.5)

अत्रापि किमपि स्वारस्यम्–

जीवनयात्रा भोजनकार्यं
भोगविलासो जीवनकार्यम्।
नेति नितान्तं निश्चिनु चित्ते
चेश्वरलब्ध्यै जीवशताब्दान्।। (2.7.49)

इत्थं स्वामिना बहुभिः छन्दोभिः मुमूक्षूणां कृते सन्मार्गः निर्दिष्टः। कविरयं ललितशैल्या रूपकोपमाद्यलङ्कारैः सांसारिकेष्वपि आध्यात्मिकं स्फुलिङ्गं ज्वालयति। क्वचित् साध्यविषयकोपदेशः तु क्वापि साधनविषयकोपदेशः एकत्र भाक्तज्ञानयोगप्रवृत्तिस्त्वपरत्र सत्यादिगुणासक्तिः सर्वत्र कान्तासम्मितोपदेशेन खल्वभिभूताः भवन्ति सहृदयाः।

समासतः एतस्य काव्यग्रन्थस्य सम्यगवलोकनेन कानिचन वैशिष्ट्यानि मुखरीभवन्ति। तद्यथा–अपेक्षानुसारं गद्यपद्ययोः अल्पदीर्घसमासप्रयोगः, आदर्शयथार्थयोः प्रावीण्येनाभिव्यक्तिः, यथार्थोन्मुखं चिन्तनं तथा च नव्यग्रन्थनसरण्याश्रयणम्। भाषायाः प्राञ्जलता भावानुकूला; अतः काव्यगुरुत्वं सर्वथा रक्षितम्। अत्र मुद्रणदोषनिवारणार्थम् आरम्भे शुद्धिपत्रं अन्ते च परिशिष्टे ग्रन्थगतानि कानिचित् सुभाषितानि प्रदत्तानि, येन ग्रन्थस्योपादेयता वर्धते। भाविनि काले एतत्काव्यमाश्रित्य कथाशिल्पविधानं वाऽनुश्रित्य ग्रन्थप्रणयनं विधास्यन्ति कवयः इत्यस्माकं काङ्क्षेति शम्।



# फार्म - ४

**नियमः ८ द्रष्टव्यः**

1. प्रकाशनस्थानम् : आरा (विहारः)
2. प्रकाशनस्य अवधिः : अर्धवार्षिकम्
3. मुद्रकस्य नाम : डॉ. गोपबन्धु मिश्रः
   किमसौ भारतस्य नागरिकः? : एवम्
   सङ्केतः : संस्कृतप्रसारपरिषद्, आरा
4. प्रकाशकस्य नाम : डॉ. गोपबन्धु मिश्रः
   किमसौ भारतस्य नागरिकः? : एवम्
   सङ्केतः : संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः)
5. सम्पादकस्य नाम : डॉ. गोपबन्धु मिश्रः
   किमसौ भारतस्य नागरिकः? : एवम्
   सङ्केतः : संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः)
6. तेषां जनानां नामानि सङ्केताश्च ये समाचारपत्रस्य स्वामिनः स्युः तथा च ये समस्तव्ययस्य एकप्रतिशतात् अधिकस्य अंशग्राहकाः स्युः : संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः)

अहं गोपबन्धु मिश्रः एतद्द्वारा उद्घोषयामि यत् मम अधिकतमस्य बोधस्य विश्वासस्य च अनुसारेण उपरि प्रदत्तं विवरणं सत्यम् अस्ति।

ह0 गोपबन्धु मिश्रः
सम्पादकः